श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरमहर्षिप्रणीते श्रीविष्णुपुराणे

॥ पञ्चमोंऽशः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1 प्रथमोऽध्यायः 3
2 द्वितीयोऽध्यायः 14
3 तृतीयोऽध्यायः 17
4 चतुर्थोऽध्यायः 21
5 पञ्चमोऽध्यायः 24
6 षष्ठोऽध्यायः 27
7 सप्तमोऽध्यायः 32
8 अष्टमोऽध्यायः 41
9 नवमोऽध्यायः 43
10 दशमोऽध्यायः 48
11 एकादशोऽध्यायः 53
12 द्वादशोऽध्यायः 56
13 त्रयोदशोऽध्यायः 59
14 चतुर्दशोऽध्यायः 66
15 पञ्चदशोऽध्यायः 68
16 षोडशोऽध्यायः 71
17 सप्तदशोऽध्यायः 74
18 अष्टादशोऽध्यायः 78
19 एकोनविंशोऽध्यायः 85

20 विंशोऽध्यायः 89
21 एकविंशोऽध्यायः 100
22 द्वाविंशोऽध्यायः 104
23 त्रयोविंशोऽध्यायः 106
24 चतुर्विंशोऽध्यायः 111
25 पञ्चविंशोऽध्यायः 114
26 षड्विंशोऽध्यायः 117
27 सप्तविंशोऽध्यायः 119
28 अष्टाविंशोऽध्यायः 123
29 एकोनत्रिंशोऽध्यायः 126
30 त्रिंशोऽध्यायः 130
31 एकत्रिंशोऽध्यायः 139
32 द्वात्रिंशोऽध्यायः 142
33 त्रयस्त्रिंशोऽध्यायः 146
34 चतुस्त्रिंशोऽध्यायः 152
35 पञ्चत्रिंशोऽध्यायः 157
36 षट्त्रिंशोऽध्यायः 162
37 सप्तत्रिंशोऽध्यायः 165
38 अष्टात्रिंशोऽध्यायः 173

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे प्रथमोऽध्यायः ॥

श्रीमैत्रेय उवाच

नृपाणां कथितस्सर्वो भवता वंशविस्तरः।
वंशानुचरितं चैव यथावदनुवर्णितम्॥ 1 ॥ 1

अंशावतारो ब्रह्मर्षे योऽयं यदुकुलोद्भवः।
विष्णोस्तं विस्तरेणाहं श्रोतुमिच्छामि तत्त्वतः॥ 2 ॥ 2

चकार यानि कर्माणि भगवान्पुरुषोत्तमः।
अंशांशेनावतीर्योर्व्यां तत्र तानि मुने वद॥ 3 ॥ 3

श्रीपराशर उवाच

मैत्रेय श्रूयतामेतद्यत्पृष्टोऽहमिह त्वया।
विष्णोरंशांशसम्भूतिचरितं जगतो हितम्॥ 4 ॥ 4

देवकस्य सुतां पूर्वं वसुदेवो महामुने।
उपयेमे महाभागां देवकीं देवतोपमाम्॥ 5 ॥ 5

कंसस्तयोर्वररथं चोदयामास सारथिः।
वसुदेवस्य देवक्याः संयोगे भोजनन्दनः॥ 6 ॥ 6

अथान्तरिक्षे वागुच्चैः कंसमाभाष्य सादरम्।
मेघगम्भीरनिर्घोषं समाभाष्येदमब्रवीत्॥ 7 ॥ 7

यामेतां वहसे मूढ सह भर्त्रा रथे स्थिताम्।
अस्यास्तवाष्टमो गर्भः प्राणानपहरिष्यति॥ 8॥ 8

श्रीपराशर उवाच

इत्याकर्ण्य समुत्पाट्य खड्गं कंसो महाबलः।
देवकीं हन्तुमारब्धो वसुदेवोऽब्रवीदिदम्॥ 9॥ 9

न हन्तव्या महाभाग देवकी भवतानघ।
समर्पयिष्ये सकलान्गर्भानस्योदरोद्भवान्॥ 10॥ 10

श्रीपराशर उवाच

तथेत्याह ततः कंसो वसुदेवं द्विजोत्तम।
न घातयामास च तां देवकीं सत्यगौरवात्॥ 11॥ 11

एतस्मिन्नेव काले तु भूरिभारावपीडिता।
जगाम धरणी मेरौ समाजं त्रिदिवौकसाम्॥ 12॥ 12

सब्रह्मकान्सुरान्सर्वान्प्रणिपत्याथ मेदिनी।
कथयामास तत्सर्वं खेदात्करुणभाषिणी॥ 13॥ 13

भूमिरुवाच

अग्निस्स्युवर्णस्य गुरुर्गवां सूर्यः परो गुरुः।
ममाप्यखिललोकानां गुरुर्नारायणो गुरुः॥ 14॥ 14

प्रजापतिपतिर्ब्रह्मा पूर्वेषामपि पूर्वजः।
कलाकाष्ठानिमेषात्मा कालश्चाव्यक्तमूर्त्तिमान्॥ 15॥ 15

तदंशभूतस्सर्वेषां समूहो वस्सुरोत्तमाः॥ 16॥ 16

आदित्या मरुतस्साध्या रुद्रा वस्वश्विवह्नयः।
पितरो ये च लोकानां स्रष्टारो ऽत्रिपुरोगमाः॥ 17॥ 17

एते तस्याप्रमेयस्य विष्णो रूपं महात्मनः॥ 18॥ 18

यक्षराक्षसदैतेयपिशाचोरगदानवाः।
गन्धर्वाप्सरसश्चैव रूपं विष्णोर्महात्मनः॥ 19॥ 19

ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः।
अहं च विषयाश्चैव सर्वं विष्णुमयं जगत्॥ 20॥ 20

तथाप्यनेकरूपस्य तस्य रूपाण्यहर्निशम्।
बाध्यबाधकतां यान्ति कल्लोला इव सागरे॥ 21॥ 21

तत्साम्प्रतममी दैत्याः कालनेमिपुरोगमाः।
मर्त्यलोकं समाक्रम्य बाधन्ते ऽहर्निशं प्रजाः॥ 22॥ 22

कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना।
उग्रसेनसुतः कंसस्सम्भूतस्स महासुरः॥ 23॥ 23

अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा।
सुन्दोऽसुरस्तथात्युग्रो बाणश्चापि बलेस्सुतः॥ 24॥ 24

तथान्ये च महावीर्या नृपाणां भवनेषु ये।
समुत्पन्ना दुरात्मानस्तान्न संख्यातुमुत्सहे॥ 25॥ 25

अक्षौहिण्योऽत्र बहुला दिव्यमूर्त्तिधरास्सुराः।
महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि॥ 26॥ 26

तद्भूरिभारपीडार्त्ता न शक्नोम्यमरेश्वराः।
विभर्त्तुमात्मानमहमिति विज्ञापयामि वः॥ 27॥ 27

क्रियतां तन्महाभागा मम भारावतारणम्।
यथा रसातलं नाहं गच्छेयमतिविह्वला॥ 28॥ 28

इत्याकर्ण्य धरावाक्यमशेषैस्त्रिदशेश्वरैः।
भुवो भारावतारार्थं ब्रह्मा प्राह प्रचोदितः॥ 29॥ 29

ब्रह्मोवाच

यथाह वसुधा सर्वं सत्यमेव दिवौकसः।
अहं भवो भवन्तश्च सर्वे नारायणात्मकाः॥ 30॥ 30

विभूतयश्च यास्तस्य तासामेव परस्परम्।
आधिक्यं न्यूनता बाध्यबाधकत्वेन वर्तते॥ 31॥ 31

तदागच्छत गच्छाम क्षीराब्धेस्तटमुत्तमम्।
तत्राराध्य हरिं तस्मै सर्वं विज्ञापयाम वै॥ 32॥ 32

सर्वथैव जगत्यर्थे स सर्वात्मा जगन्मयः।
सत्त्वांशेनावतीर्योर्व्यां धर्मस्य कुरुते स्थितिम्॥ 33॥ 33

श्रीपराशर उवाच

इत्युक्त्वा प्रययौ तत्र सह देवैः पितामहः।
समाहितमनाश्चैवं तुष्टाव गरुडध्वजम्॥ 34॥ 34

ब्रह्मोवाच

द्वे विद्ये त्वमनाम्नाय परा चैवापरा तथा।
त एव भवतो रूपे मूर्तामूर्तात्मिके प्रभो॥ 35॥ 35

द्वे ब्रह्मणी त्वणीयोऽतिस्थूलात्मन्सर्व सर्ववित्।
शब्दब्रह्म परं चैव ब्रह्म ब्रह्ममयस्य यत्॥ 36॥ 36

ऋग्वेदस्त्वं यजुर्वेदस्सामवेदस्त्वथर्वणः।
शिक्षा कल्पो निरुक्तं च च्छन्दो ज्यौतिषमेव च॥ **37**॥ 37

इतिहासपुराणे च तथा व्याकरणं प्रभो।
मीमांसा न्यायशास्त्रं च धर्मशास्त्राण्यधोक्षज॥ **38**॥ 38

आत्मात्मदेहगुणवद्विचाराचारि यद्वचः।
तदप्याद्यपते नान्यदध्यात्मात्मस्वरूपवत्॥ **39**॥ 39

त्वमव्यक्तमनिर्देश्यमचिन्त्यानामवर्णवत्।
अपाणिपादरूपं च शुद्धं नित्यं परात्परम्॥ **40**॥ 40

शृणोष्यकर्णः परिपश्यसि त्व -
मचक्षुरेको बहुरूपरूपः।
अपादहस्तो जवनो ग्रहीता
त्वं वेत्सि सर्वं न च सर्ववेद्यः॥ **41**॥ 41

अणोरणीयांसमसत्स्वरूपं
त्वां पश्यतोऽज्ञाननिवृत्तिरग्र्या।
धीरस्य धीरस्य बिभर्त्ति नान्य -
द्धरेण्यरूपात्परतः परात्मन्॥ **42**॥ 42

त्वं विश्वनाभिर्भुवनस्य गोप्ता
सर्वाणि भूतानि तवान्तराणि।
यद्भूतभव्यं यदणोरणीयः
पुमांस्त्वमेकः प्रकृतेः परस्तात्॥ **43**॥ 43

एकश्चतुर्द्धा भगवान्हुताशो
वर्चोविभूतिं जगतो ददासि।

त्वं विश्वतश्चक्षुरनन्तमूर्ते
त्रेधा पदं त्वं निदधासि धातः॥ 44॥ 44

यथाग्निरेको बहुधा समिध्यते
विकारभेदैरविकाररूपः।
तथा भवान्सर्वगतैकरूपी
रूपाण्यशेषाण्यनुपुष्यतीश॥ 45॥ 45

एकं त्वमग्र्यं परमं पदं य -
त्पश्यन्ति त्वां सूरयो ज्ञानदृश्यम्।
त्वत्तो नान्यत्किञ्चिदस्ति स्वरूपं
यद्वा भूतं यच्च भव्यं परात्मन्॥ 46॥ 46

व्यक्ताव्यक्तस्वरूपस्त्वं समष्टिव्यष्टिरूपवान्।
सर्वज्ञस्सर्ववित्सर्वशक्तिज्ञानबलद्धिमान्॥ 47॥ 47

अन्यूनश्चाप्यवृद्धिश्च स्वाधीनो नादिमान्वशी।
क्लमतन्द्राभयक्रोधकामादिभिरसंयुतः॥ 48॥ 48

निरवद्यः परः प्राप्तेर्निरधिष्ठोऽक्षरः क्रमः।
सर्वेश्वरः पराधारो धाम्नां धामात्मकोऽक्षयः॥ 49॥ 49

सकलावरणातीत निरालम्बनभावन।
महाविभूतिसंस्थान नमस्ते पुरुषोत्तम॥ 50॥ 50

नाकारणात्कारणाद्वा कारणाकारणान्न च।
शरीरग्रहणं वापि धर्मत्राणाय केवलम्॥ 51॥ 51

श्रीपराशर उवाच

इत्येवं संस्तवं श्रुत्वा मनसा भगवानजः।
ब्रह्माणमाह प्रीतेन विश्वरूपं प्रकाशयन्॥ 52॥ 52

श्रीभगवानुवाच

भो भो ब्रह्मंस्त्वया मत्तस्सह देवैर्यदिष्यते।
तदुच्यतामशेषं च सिद्धमेवावधार्यताम्॥ 53॥ 53

श्रीपराशर उवाच

ततो ब्रह्मा हरेर्दिव्यं विश्वरूपमवेक्ष्य तत्।
तुष्टाव भूयो देवेषु साध्वसावनतात्मसु॥ 54॥ 54

ब्रह्मोवाच

नमो नमस्तेऽस्तु सहस्रकृत्वः
सहस्रबाहो बहुवक्त्रपाद।
नमो नमस्ते जगतः प्रवृत्ति -
विनाशसंस्थानकराप्रमेय॥ 55॥ 55

सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण
गरीयसामप्यतिगौरवात्मन्।
प्रधानबुद्धीन्द्रियवत्प्रधान -
मूलात्परात्मन्भगवन्प्रसीद॥ 56॥ 56

एषा मही देव महीप्रसूतै -
र्महासुरैः पीडितशैलबन्धा।
परायणां त्वां जगतामुपैति
भारावतारार्थमपारसार॥ 57॥ 57

एते वयं वृत्ररिपुस्तथायं
नासत्यदस्रौ वरुणस्तथैव।

इमे च रुद्रा वसवस्ससूर्या -
स्समीरणाग्निप्रमुखास्तथान्ये ॥ **58** ॥ 58

सुरास्समस्तास्सुरनाथ कार्य -
मेभिर्मया यच्च तदीश सर्वम्।
आज्ञापयाज्ञां परिपालयन्त -
स्तवैव तिष्ठाम सदास्तदोषाः ॥ **59** ॥ 59

श्रीपराशर उवाच

एवं संस्तूयमानस्तु भगवान्परमेश्वरः।
उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ **60** ॥ 60

उवाच च सुरानेतौ मत्केशौ वसुधातले।
अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ॥ **61** ॥ 61

सुराश्च सकलास्स्वांशैरवतीर्य महीतले।
कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैर्महासुरैः ॥ **62** ॥ 62

ततः क्षयमशेषास्ते दैतेया धरणीतले।
प्रयास्यन्ति न सन्देहो मद्दृक्पातविचूर्णिताः ॥ **63** ॥ 63

वसुदेवस्य या पत्नी देवकी देवतोपमा।
तत्रायमष्टमो गर्भो मत्केशो भविता सुराः ॥ **64** ॥ 64

अवतीर्य च तत्रायं कंसं घातयिता भुवि।
कालनेमिं समुद्भूतमित्युक्त्वान्तर्दधे हरिः ॥ **65** ॥ 65

अदृश्याय ततस्तस्मै प्रणिपत्य महामुने।
मेरुपृष्ठं सुरा जग्मुरवतेरुश्च भूतले ॥ **66** ॥ 66

कंसाय चाष्टमो गर्भो देवक्या धरणीधरः।
भविष्यतीत्याचचक्षे भगवान्नारदो मुनिः॥ 67॥ 67

कंसोऽपि तदुपश्रुत्य नारदात्कुपितस्ततः।
देवकीं वसुदेवं च गृहे गुप्तावधारयत्॥ 68॥ 68

वसुदेवेन कंसाय तेनैवोक्तं यथा पुरा।
तथैव वसुदेवोऽपि पुत्रमर्पितवान्द्विज॥ 69॥ 69

हिरण्यकशिपोः पुत्राष्षड्गर्भा इति विश्रुताः।
विष्णुप्रयुक्ता तान्निद्रा क्रमाद्गर्भानयोजयत्॥ 70॥ 70

योगनिद्रा महामाया वैष्णवी मोहितं यया।
अविद्यया जगत्सर्वं तामाह भगवान्हरिः॥ 71॥ 71

श्रीभगवानुवाच

निद्रे गच्छ ममादेशात्पातालतलसंश्रयान्।
एकैकत्वेन षड्गर्भान्देवकीजठरं नय॥ 72॥ 72

हतेषु तेषु कंसेन शेषाख्योंऽशस्सतो मम।
अंशांशेनोदरे तस्यास्सप्तमः सम्भविष्यति॥ 73॥ 73

गोकुले वसुदेवस्य भार्यान्या रोहिणी स्थिता।
तस्यास्स सम्भूतिसमं देवि नेयस्त्वयोदरम्॥ 74॥ 74

सप्तमो भोजराजस्य भयाद्रोधोपरोधतः।
देवक्याः पतितो गर्भ इति लोको वदिष्यति॥ 75॥ 75

गर्भसङ्कर्षणात्सोऽथ लोके सङ्कर्षणेति वै।
संज्ञामवाप्स्यते वीरश्श्वेताद्रिशिखरोपमः॥ 76॥ 76

ततोऽहं सम्भविष्यामि देवकीजठरे शुभे।
गर्भे त्वया यशोदाया गन्तव्यमविलम्बितम्॥ 77॥ 77

प्रावृड्काले च नभसि कृष्णाष्टम्यामहं निशि।
उत्पत्स्यामि नवम्यां तु प्रसूतिं त्वमवाप्स्यसि॥ 78॥ 78

यशोदाशयने मां तु देवक्यास्त्वामनिन्दिते।
मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति॥ 79॥ 79

कंसश्च त्वामुपादाय देवि शैलशिलातले।
प्रक्षेप्स्यत्यन्तरिक्षे च संस्थानं त्वमवाप्स्यसि॥ 80॥ 80

ततस्त्वां शतदृक्छक्रः प्रणम्य मम गौरवात्।
प्रणिपातानतशिरा भगिनीत्वे ग्रहीष्यति॥ 81॥ 81

त्वं च शुम्भनिशुम्भादीन्हत्वा दैत्यान्सहस्रशः।
स्थानैरनेकैः पृथिवीमशेषां मण्डयिष्यसि॥ 82॥ 82

त्वं भूतिः सन्नतिः क्षान्तिः
कान्तिर्द्यौः पृथिवी धृतिः।
लज्जा पुष्टिरुषा या तु
काचिदन्या त्वमेव सा॥ 83॥ 83

ये त्वामार्येति दुर्गेति वेदगर्भाम्बिकेति च।
भद्रेति भद्रकालीति क्षेमदा भाग्यदेति च॥ 84॥ 84

प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्रमूर्त्तयः।
तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति॥ 85॥ 85

सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता।
नृणामशेषकामांस्त्वं प्रसन्ना सम्प्रदास्यसि॥ 86॥ 86

ते सर्वे सर्वदा भद्रे मत्प्रसादादसंशयम्।
असन्दिग्धा भविष्यन्ति गच्छ देवि यथोदितम्॥ 87॥ 87

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे प्रथमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे द्वितीयोऽध्यायः ॥

श्रीपराशर उवाच

यथोक्तं सा जगद्धात्री देवदेवेन वै तथा।
षड्गर्भगर्भविन्यासं चक्रे चान्यस्य कर्षणम् ॥ 1 ॥ 88

सप्तमे रोहिणीं गर्भे प्राप्ते गर्भं ततो हरिः।
लोकत्रयोपकाराय देवक्याः प्रविवेश ह ॥ 2 ॥ 89

योगनिद्रा यशोदायास्तस्मिन्नेव तथा दिने।
सम्भूता जठरे तद्वद्यथोक्तं परमेष्ठिना ॥ 3 ॥ 90

ततो ग्रहगणस्सम्यक्प्रचचार दिवि द्विज।
विष्णोरंशे भुवं याते ऋतवश्चाबभुश्शुभाः ॥ 4 ॥ 91

न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा।
जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुः ॥ 5 ॥ 92

अदृष्टाः पुरुषैस्स्त्रीभिर्देवकीं देवतागणाः।
बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥ 6 ॥ 93

देवता ऊचुः

प्रकृतिस्त्वं परा सूक्ष्मा ब्रह्मगर्भाभवः पुरा।
ततो वाणी जगद्धातुर्वेदगर्भासि शोभने ॥ 7 ॥ 94

सृज्यस्वरूपगर्भासि सृष्टिभूता सनातने।
बीजभूता तु सर्वस्य यज्ञभूताभवस्त्रयी॥ 8॥ 95

फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः।
अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः॥ 9॥ 96

ज्योत्स्ना वासरगर्भा त्वं ज्ञानगर्भासि सन्नतिः।
नयगर्भा परा नीतिर्लज्जा त्वं प्रश्रयोद्वहा॥ 10॥ 97

कामगर्भा तथेच्छा त्वं तुष्टिः सन्तोषगर्भिणी।
मेधा च बोधगर्भासि धैर्यगर्भोद्वहा धृतिः॥ 11॥ 98

ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहैतुकी।
एता विभूतयो देवि तथान्याश्च सहस्रशः।
तथासंख्या जगद्धात्रि साम्प्रतं जठरे तव॥ 12॥ 99

समुद्राद्रिनदीद्वीपवनपत्तनभूषणा।
ग्रामखर्वटखेटाढ्या समस्ता पृथिवी शुभे॥ 13॥ 100

समस्तवह्नयोऽभ्भांसि सकलाश्च समीरणाः।
ग्रहर्क्षतारकाचित्रं विमानशतसंकुलम्॥ 14॥ 101

अवकाशमशेषस्य यद्ददाति नभःस्थलम्।
भूर्लोकश्च भुवर्लोकस्स्वर्लोकोऽथ महर्जनः॥ 15॥ 102

तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे।
तदन्तरे स्थिता देवा दैत्यगन्धर्वचारणाः॥ 16॥ 103

महोरगास्तथा यक्षा राक्षसाः प्रेतगुह्यकाः।
मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि॥ 17॥ 104

तैरन्तःस्थैरनन्तोऽसौ सर्वगः सर्वभावनः॥ 18॥ 105

रूपकर्मस्वरूपाणि न परिच्छेदगोचरे।
यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव॥ **19**॥ 106

त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरम्बरे।
त्वं सर्वलोकरक्षार्थमवतीर्णा महीतले॥ **20**॥ 107

प्रसीद देवि सर्वस्य जगतश्शं शुभे कुरु।
प्रीत्या तं धारयेशानं धृतं येनाखिलं जगत्॥ **21**॥ 108

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे द्वितीयोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे तृतीयोऽध्यायः ॥

श्रीपराशर उवाच

एवं संस्तूयमाना सा देवैर्देवमधारयत्।
गर्भेण पुण्डरीकाक्षं जगतस्त्राणकारणम्॥ **1** ॥ 109

ततोऽखिलजगत्पद्मबोधायाच्युतभानुना।
देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना॥ **2** ॥ 110

तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखम्।
बभूव सर्वलोकस्य कौमुदी शशिनो यथा॥ **3** ॥ 111

सन्तस्सन्तोषमधिकं प्रशमं चण्डमारुताः।
प्रसादं निम्नगा याता जायमाने जनार्दने॥ **4** ॥ 112

सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम्।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः॥ **5** ॥ 113

ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरिक्षगाः।
जज्वलुश्चाग्नयश्शान्ता जायमाने जनार्दने॥ **6** ॥ 114

मन्दं जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विज।
अर्द्धरात्रेऽखिलाधारे जायमाने जनार्दने॥ **7** ॥ 115

फुल्लेन्दीवरपत्राभं चतुर्बाहुमुदीक्ष्य तम्।
श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः॥ **8** ॥ 116

अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्महामतिः।
विज्ञापयामास तदा कंसाद्भीतो द्विजोत्तम॥ 9॥ 117

वसुदेव उवाच

जातोऽसि देवदेवेश शङ्खचक्रगदाधरम्।
दिव्यरूपमिदं देव प्रसादेनोपसंहर॥ 10॥ 118

अद्यैव देव कंसोऽयं कुरुते मम घातनम्।
अवतीर्ण इति ज्ञात्वा त्वमस्मिन्मम मन्दिरे॥ 11॥ 119

देवक्युवाच

योऽनन्तरूपोऽखिलविश्वरूपो
गर्भेऽपि लोकान्वपुषा बिभर्ति।
प्रसीदतामेष स देवदेवो
यो माययाविष्कृतबालरूपः॥ 12॥ 120

उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजम्।
जानातु मावतारं ते कंसोऽयं दितिजन्मजः॥ 13॥ 121

श्रीभगवानुवाच

स्तुतोऽहं यत्त्वया पूर्वं पुत्रार्थिन्या तदद्य ते।
सफलं देवि सञ्जातं जातोऽहं यत्तवोदरात्॥ 14॥ 122

श्रीपराशर उवाच

इत्युक्त्वा भगवांस्तूष्णीं बभूव मुनिसत्तम।
वसुदेवोऽपि तं रात्रावादाय प्रययौ बहिः॥ 15॥ 123

मोहिताश्चाभवंस्तत्र रक्षिणो योगनिद्रया।
मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ॥ 16॥ 124

वर्षतां जलदानां च तोयमत्युल्बणं निशि।
संवृत्यानुययौ शेषः फणैरानकदुन्दुभिम्॥ 17॥ 125

यमुनां चातिगम्भीरां नानावर्त्तशताकुलाम्।
वसुदेवो वहन्विष्णुं जानुमात्रवहां ययौ॥ 18॥ 126

कंसस्य करदानाय तत्रैवाभ्यागतांस्तटे।
नन्दादीन् गोपवृद्धांश्च यमुनाया ददर्श सः॥ 19॥ 127

तस्मिन्काले यशोदापि मोहिता योगनिद्रया।
तामेव कन्यां मैत्रेय प्रसूता मोहते जने॥ 20॥ 128

वसुदेवोऽपि विन्यस्य बालमादाय दारिकाम्।
यशोदाशयनात्तूर्णमाजगामामितद्युतिः॥ 21॥ 129

ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम्।
नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ॥ 22॥ 130

आदाय वसुदेवोऽपि दारिकां निजमन्दिरे।
देवकीशयने न्यस्य यथापूर्वमतिष्ठत॥ 23॥ 131

ततो बालध्वनिं श्रुत्वा रक्षिणस्सहसोत्थिताः।
कंसायावेदयामासुर्देवकीप्रसवं द्विज॥ 24॥ 132

कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकाम्।
मुञ्च मुञ्चेति देवक्या सन्नकण्ठ्या निवारितः॥ 25॥ 133

चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थिता।
अवाप रूपं सुमहत्सायुधाष्टमहाभुजम्॥ 26॥ 134

प्रजहास तथैवोच्चैः कंसं च रुषिताब्रवीत्।
किं मया क्षिप्तया कंस जातो यस्त्वां वधिष्यति॥ 27॥ 135

सर्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते।
तदेतत्सम्प्रधार्याशु क्रियतां हितमात्मनः॥ 28॥ 136

इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गन्धभूषणा।
पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसा॥ 29॥ 137

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे तृतीयोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे चतुर्थोऽध्यायः ॥

श्रीपराशर उवाच

कंसस्तदोद्विग्नमनाः प्राह सर्वान्महासुरान्।
प्रलम्बकेशिप्रमुखानाहूयासुरपुंगवान्॥ 1 ॥ 138

कंस उवाच

हे प्रलम्ब महाबाहो केशिन् धेनुक पूतने।
अरिष्टाद्यास्तथैवान्ये श्रूयतां वचनं मम॥ 2 ॥ 139

मां हन्तुममरैर्यत्नः कृतः किल दुरात्मभिः।
मद्वीर्यतापितान्वीरो न त्वेतान्गणयाम्यहम्॥ 3 ॥ 140

किमिन्द्रेणाल्पवीर्येण किं हरेणैकचारिणा।
हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना॥ 4 ॥ 141

किमादित्यैः किं वसुभिरल्पवीर्यैः किमग्निभिः।
किं वान्यैरमरैः सर्वैर्मद्बाहुबलनिर्जितैः॥ 5 ॥ 142

किं न दृष्टोऽमरपतिर्मया संयुगमेत्य सः।
पृष्ठेनैव वहन्बाणानपागच्छन्न वक्षसा॥ 6 ॥ 143

मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा।
मद्बाणभिन्नैर्जलदैर्नापो मुक्ता यथेप्सिताः॥ 7 ॥ 144

किमुर्व्यामवनीपाला मद्बाहुबलभीरवः।
न सर्वे सन्नतिं याता जरासन्धमृते गुरुम्॥ 8॥ 145

अमरेषु ममावज्ञा जायते दैत्यपुंगवाः।
हास्यं मे जायते वीरास्तेषु यत्नपरेष्वपि॥ 9॥ 146

तथापि खलु दुष्टानां तेषामप्यधिकं मया।
अपकाराय दैत्येन्द्रा यतनीयं दुरात्मनाम्॥ 10॥ 147

तद्ये यशस्विनः केचित्पृथिव्यां ये च याजकाः।
कार्यो देवापकाराय तेषां सर्वात्मना वधः॥ 11॥ 148

उत्पन्नश्चापि मे मृत्युर्भूतपूर्वस्स वै किल।
इत्येतद्वारिका प्राह देवकीगर्भसम्भवा॥ 12॥ 149

तस्माद्बालेषु च परो यत्नः कार्यो महीतले।
यत्रोद्रिक्तं बलं बाले स हन्तव्यः प्रयत्नतः॥ 13॥ 150

इत्याज्ञाप्यासुरान्कंसः प्रविश्याशु गृहं ततः।
मुमोच वसुदेवं च देवकीं च निरोधतः॥ 14॥ 151

कंस उवाच

युवयोर्घातिता गर्भा वृथैवैते मयाधुना।
कोऽप्यन्य एव नाशाय बालो मम समुद्गतः॥ 15॥ 152

तदलं परितापेन नूनं तद्भाविनो हि ते।
अर्भका युवयोर्दोषाद्यायुषो यद्वियोजिताः॥ 16॥ 153

श्रीपराशर उवाच

इत्याश्वास्य विमुक्त्वा च
कंसस्तौ परिशंकितः।

अन्तर्गृहं द्विजश्रेष्ठ
प्रविवेश ततः स्वकम्॥ 17॥

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे चतुर्थोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे पञ्चमोऽध्यायः ॥

श्रीपराशर उवाच

विमुक्तो वसुदेवोऽपि नन्दस्य शकटं गतः।
प्रहृष्टं दृष्टवान्नन्दं पुत्रो जातो ममेति वै ॥ 1 ॥ 155

वसुदेवोऽपि तं प्राह दिष्ट्या दिष्ट्येति सादरम्।
वार्द्धकेऽपि समुत्पन्नस्तनयोऽयं तवाधुना ॥ 2 ॥ 156

दत्तो हि वार्षिकस्सर्वो भवद्भिर्नृपतेः करः।
यदर्थमागतास्तस्मान्नात्र स्थेयं महाधनैः ॥ 3 ॥ 157

यदर्थमागताः कार्यं तन्निष्पन्नं किमास्यते।
भवद्भिर्गम्यतां नन्द तच्छीघ्रं निजगोकुलम् ॥ 4 ॥ 158

ममापि बालकस्तत्र रोहिणीप्रभवो हि यः।
स रक्षणीयो भवता यथायं तनयो निजः ॥ 5 ॥ 159

इत्युक्ताः प्रययुर्गोपा नन्दगोपपुरोगमाः।
शकटारोपितैर्भाण्डैः करं दत्त्वा महाबलाः ॥ 6 ॥ 160

वसतां गोकुले तेषां पूतना बालघातिनी।
सुप्तं कृष्णमुपादाय रात्रौ तस्मै स्तनं ददौ ॥ 7 ॥ 161

यस्मै यस्मै स्तनं रात्रौ पूतना सम्प्रयच्छति।
तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते ॥ 8 ॥ 162

कृष्णस्तु तत्स्तनं गाढं कराभ्यामतिपीडितम्।
गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः॥ 9॥ 163

सातिमुक्तमहारावा विच्छिन्नस्नायुबन्धना।
पपात पूतना भूमौ म्रियमाणातिभीषणा॥ 10॥ 164

तन्नादश्रुतिसन्त्रस्ताः प्रबुद्धास्ते व्रजौकसः।
ददृशुः पूतनोत्सङ्गे कृष्णं तां च निपातिताम्॥ 11॥ 165

आदाय कृष्णं सन्त्रस्ता यशोदापि द्विजोत्तम।
गोपुच्छभ्रामणेनाथ बालदोषमपाकरोत्॥ 12॥ 166

गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके।
कृष्णस्य प्रददौ रक्षां कुर्वंश्चैतदुदीरयन्॥ 13॥ 167

नन्दगोप उवाच

रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्॥ 14॥ 168

येन दंष्ट्राग्रविधृता धारयत्यवनिर्जगत्।
वराहरूपधृग्देवस्स त्वां रक्षतु केशवः॥ 15॥ 169

नखाङ्कुरविनिर्भिन्नवैरिवक्षस्स्थलो विभुः।
नृसिंहरूपी सर्वत्र रक्षतु त्वां जनार्दनः॥ 16॥ 170

वामनो रक्षतु सदा भवन्तं यः क्षणादभूत्।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः॥ 17॥ 171

शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः।
गुह्यं च जठरं विष्णुर्जङ्घे पादौ जनार्दनः॥ 18॥ 172

मुखं बाहू प्रबाहू च मनः सर्वेन्द्रियाणि च।
रक्षत्वव्याहतैश्वर्यस्तव नारायणोऽव्ययः॥ **19**॥ 173

शार्ङ्गचक्रगदापाणेश्शङ्खनादहताः क्षयम्।
गच्छन्तु प्रेतकूष्माण्डराक्षसा ये तवाहिताः॥ **20**॥ 174

त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः॥ **21**॥ 175

श्रीपराशर उवाच

एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः।
शायितश्शकटस्याधो बालपर्यङ्किकातले॥ **22**॥ 176

ते च गोपा महद्दृष्ट्वा पूतनायाः कलेवरम्।
मृतायाः परमं त्रासं विस्मयं च तदा ययुः॥ **23**॥ 177

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे पञ्चमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे षष्ठोऽध्यायः ॥

श्रीपराशर उवाच

कदाचिच्छकटस्याधश्शयानो मधुसूदनः।
चिक्षेप चरणावूर्ध्वं स्तन्यार्थी प्ररुरोद ह ॥ 1 ॥ 178

तस्य पादप्रहारेण शकटं परिवर्तितम्।
विध्वस्तकुम्भभाण्डं तद्विपरीतं पपात वै ॥ 2 ॥ 179

ततो हाहाकृतं सर्वो गोपगोपीजनो द्विज।
आजगामाथ ददृशे बालमुत्तानशायिनम् ॥ 3 ॥ 180

गोपाः केनेति केनेदं शकटं परिवर्तितम्।
तत्रैव बालकाः प्रोचुर्बालेनानेन पातितम् ॥ 4 ॥ 181

रुदता दृष्टमस्माभिः पादविक्षेपपातितम्।
शकटं परिवृत्तं वै नैतदन्यस्य चेष्टितम् ॥ 5 ॥ 182

ततः पुनरतीवासन्गोपा विस्मयचेतसः।
नन्दगोपोऽपि जग्राह बालमत्यन्तविस्मितः ॥ 6 ॥ 183

यशोदा शकटारूढभग्नभाण्डकपालिकाः।
शकटं चार्चयामास दधिपुष्पफलाक्षतैः ॥ 7 ॥ 184

गर्गश्च गोकुले तत्र वसुदेवप्रचोदितः।
प्रच्छन्न एव गोपानां संस्कारानकरोत्तयोः ॥ 8 ॥ 185

ज्येष्ठं च राममित्याह कृष्णं चैव तथावरम्।
गर्गो मतिमतां श्रेष्ठो नाम कुर्वन्महामतिः॥ 9॥ 186

स्वल्पेनैव तु कालेन रिङ्गिणौ तौ तदा व्रजे।
घृष्टजानुकरौ विप्र बभूवतुरुभावपि॥ 10॥ 187

करीषभस्मदिग्धाङ्गौ भ्रममाणावितस्ततः।
न निवारयितुं शेके यशोदा तौ न रोहिणी॥ 11॥ 188

गोवाटमध्ये क्रीडन्तौ वत्सवाटं गतौ पुनः।
तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ॥ 12॥ 189

यदा यशोदा तौ बालावेकस्थानचरावुभौ।
शशाक नो वारयितुं क्रीडन्तावतिचञ्चलौ॥ 13॥ 190

दाम्ना मध्ये ततो बद्ध्वा बबन्ध तमुलूखले।
कृष्णमक्लिष्टकर्माणमाह चेदममर्षिता॥ 14॥ 191

यदि शक्नोषि गच्छ त्वमतिचञ्चलचेष्टित।
इत्युक्त्वाथ निजं कर्म सा चकार कुटुम्बिनी॥ 15॥ 192

व्यग्रायामथ तस्यां स कर्षमाण उलूखलम्।
यमलार्जुनमध्येन जगाम कमलेक्षणः॥ 16॥ 193

कर्षता वृक्षयोर्मध्ये तिर्यग्गतमुलूखलम्।
भग्नावुत्तुङ्गशाखाग्रौ तेन तौ यमलार्जुनौ॥ 17॥ 194

ततः कटकटाशब्दसमाकर्णनतत्परः।
आजगाम व्रजजनो ददर्श च महाद्रुमौ॥ 18॥ 195

नवोद्गताल्पदन्तांशुसितहासं च बालकम्।
तयोर्मध्यगतं दाम्ना बद्धं गाढं तथोदरे॥ 19॥ 196

ततश्च दामोदरतां स ययौ दामबन्धनात्॥ 20॥ 197

गोपवृद्धास्ततः सर्वे नन्दगोपपुरोगमाः।
मन्त्रयामासुरुद्विग्ना महोत्पातातिभीरवः॥ 21॥ 198

स्थानेनेह न नः कार्यं व्रजामोऽन्यन्महावनम्।
उत्पाता बहवो ह्यत्र दृश्यन्ते नाशहेतवः॥ 22॥ 199

पूतनाया विनाशश्च शकटस्य विपर्ययः।
विना वातादिदोषेण द्रुमयोः पतनं तथा॥ 23॥ 200

वृन्दावनमितः स्थानात्तस्माद्गच्छाम मा चिरम्।
यावद्धौममहोत्पातदोषो नाभिभवेद्व्रजम्॥ 24॥ 201

इति कृत्वा मतिं सर्वे गमने ते व्रजौकसः।
ऊचुस्स्वं स्वं कुलं शीघ्रं गम्यतां मा विलम्बथ॥ 25॥ 202

ततः क्षणेन प्रययुः शकटैर्गोधनैस्तथा।
यूथशो वत्सपालाश्च कालयन्तो व्रजौकसः॥ 26॥ 203

द्रव्यावयवनिर्द्धूतं क्षणमात्रेण तत्तथा।
काकभाससमाकीर्णं व्रजस्थानमभूद्द्विज॥ 27॥ 204

वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा।
शुभेन मनसा ध्यातं गवां सिद्धिमभीप्सता॥ 28॥ 205

ततस्तत्रातिरूक्षेऽपि घर्मकाले द्विजोत्तम।
प्रावृट्काल इवोद्भूतं नवशष्पं समन्ततः॥ 29॥ 206

स समावासितः सर्वो व्रजो वृन्दावने ततः।
शकटीवाटपर्यन्तश्चन्द्रार्द्धाकारसंस्थितिः॥ 30॥ 207

वत्सपालौ च संवृत्तौ रामदामोदरौ ततः।
एकस्थानस्थितौ गोष्ठे चेरतुर्बाललीलया॥ 31॥ 208

बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसकौ।
गोपवेणुकृतातोद्यपत्रवाद्यकृतस्वनौ॥ 32॥ 209

काकपक्षधरौ बालौ कुमाराविव पावकी।
हसन्तौ च रमन्तौ च चेरतुः स्म महावनम्॥ 33॥ 210

क्वचिद्वहन्तावन्योन्यं क्रीडमानौ तथा परैः।
गोपपुत्रैस्समं वत्सांश्चारयन्तौ विचेरतुः॥ 34॥ 211

कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे।
सर्वस्य जगतः पालौ वत्सपालौ बभूवतुः॥ 35॥ 212

प्रावृड्कालस्ततोऽतीवमेघौघस्थगिताम्बरः।
बभूव वारिधाराभिरैक्यं कुर्वन्दिशामिव॥ 36॥ 213

प्ररूढनवशष्पाढ्या शक्रगोपाचिता मही।
तथा मारकतीवासीत्पद्मरागविभूषिता॥ 37॥ 214

ऊहुरुन्मार्गवाहीनि निम्नगाम्भांसि सर्वतः।
मनांसि दुर्विनीतानां प्राप्य लक्ष्मीं नवामिव॥ 38॥ 215

न रेजेऽन्तरितश्चन्द्रो निर्मलो मलिनैर्घनैः।
सद्वादिवादो मूर्खाणां प्रगल्भाभिरिवोक्तिभिः॥ 39॥ 216

निर्गुणेनापि चापेन शक्रस्य गगने पदम्।
अवाप्यताविवेकस्य नृपस्येव परिग्रहे॥ 40॥ 217

मेघपृष्ठे बलाकानां रराज विमला ततिः।
दुर्वृत्ते वृत्तचेष्टेव कुलीनस्यातिशोभना॥ 41॥ 218

न बबन्धाम्बरे स्थैर्यं विद्युदत्यन्तचञ्चला।
मैत्रीव प्रवरे पुंसि दुर्जनेन प्रयोजिता॥ **42** ॥ 219

मार्गा बभूवुरस्पष्टास्तृणशष्पचयावृताः।
अर्थान्तरमनुप्राप्ताः प्रजडानामिवोक्तयः॥ **43** ॥ 220

उन्मत्तशिखिसारङ्गे तस्मिन्काले महावने।
कृष्णरामौ मुदा युक्तौ गोपालैश्चेरतुस्सह॥ **44** ॥ 221

क्वचिद्गोभिस्समं रम्यं गेयतानरतावुभौ।
चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रितौ॥ **45** ॥ 222

क्वचित्कदम्बस्रक्चित्रौ मयूरस्रग्विराजितौ।
विलिप्तौ क्वचिदासातां विविधैर्गिरिधातुभिः॥ **46** ॥ 223

पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ।
क्वचिद्गर्जति जीमूते हाहाकाररवाकुलौ॥ **47** ॥ 224

गायतामन्यगोपानां प्रशंसापरमौ क्वचित्।
मयूरकेकानुगतौ गोपवेणुप्रवादकौ॥ **48** ॥ 225

इति नानाविधैर्भावैरुत्तमप्रीतिसंयुतौ।
क्रीडन्तौ तौ वने तस्मिंश्चेरतुस्तुष्टमानसौ॥ **49** ॥ 226

विकाले च समं गोभिर्गोपवृन्दसमन्वितौ।
विहृत्याथ यथायोगं व्रजमेत्य महाबलौ॥ **50** ॥ 227

गोपैस्समानैस्सहितौ क्रीडन्तावमराविव।
एवं तावूषतुस्तत्र रामकृष्णौ महाद्युती॥ **51** ॥ 228

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे षष्ठोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे सप्तमोऽध्यायः ॥

श्रीपराशर उवाच

एकदा तु विना रामं कृष्णो वृन्दावनं ययौ।
विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्वलः॥ 1 ॥ 229

स जगामाथ कालिन्दीं लोलकल्लोलशालिनीम्।
तीरसंलग्नफेनौघैर्हसन्तीमिव सर्वतः॥ 2 ॥ 230

तस्याञ्चातिमहाभीमं विषाग्निश्रितवारिकम्।
ह्रदं कालियनागस्य ददर्शातिविभीषणम्॥ 3 ॥ 231

विषाग्निना प्रसरता दग्धतीरमहीरुहम्।
वाताहताम्बुविक्षेपस्पर्शदग्धविहङ्गमम्॥ 4 ॥ 232

तमतीव महारौद्रं मृत्युवक्त्रमिवापरम्।
विलोक्य चिन्तयामास भगवान्मधुसूदनः॥ 5 ॥ 233

अस्मिन्वसति दुष्टात्मा कालियोऽसौ विषायुधः।
यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः पयोनिधिम्॥ 6 ॥ 234

तेनेयं दूषिता सर्वा यमुना सागरङ्गमा।
न नरैर्गोधनैश्चापि तृषार्तैरुपभुज्यते॥ 7 ॥ 235

तदस्य नागराजस्य कर्तव्यो निग्रहो मया।
निस्त्रासास्तु सुखं येन चरेयुर्व्रजवासिनः॥ 8 ॥ 236

एतदर्थं तु लोकेऽस्मिन्नवतारः कृतो मया।
यदेषामुत्पथस्थानां कार्या शान्तिर्दुरात्मनाम्॥ 9॥ 237

तदेतं नातिदूरस्थं कदम्बमुरुशाखिनम्।
अधिरुह्य पतिष्यामि ह्रदेऽस्मिन्ननिलाशिनः॥ 10॥ 238

श्रीपराशर उवाच

इत्थं विचिन्त्य बद्ध्वा च गाढं परिकरं ततः।
निपपात ह्रदे तत्र नागराजस्य वेगतः॥ 11॥ 239

तेनातिपतता तत्र क्षोभितस्स महाह्रदः।
अत्यर्थं दूरजातांस्तु समसिञ्चन्महीरुहान्॥ 12॥ 240

तेऽहिदुष्टविषज्वालातप्ताम्बुपवनोक्षिताः।
जज्वलुः पादपास्सद्यो ज्वालाव्याप्तदिगन्तराः॥ 13॥ 241

आस्फोटयामास तदा कृष्णो नागह्रदे भुजम्।
तच्छब्दश्रवणाच्चाशु नागराजोऽभ्युपागमत्॥ 14॥ 242

आताम्रनयनः कोपाद्विषज्वालाकुलैर्मुखैः।
वृतो महाविषैश्चान्यैरुरगैरनिलाशनैः॥ 15॥ 243

नागपत्न्यश्च शतशो हारिहारोपशोभिताः।
प्रकम्पिततनुक्षेपचलत्कुण्डलकान्तयः॥ 16॥ 244

ततः प्रवेष्टितस्सर्पैस्स कृष्णो भोगबन्धनैः।
ददंशुस्तेऽपि तं कृष्णं विषज्वालाकुलैर्मुखैः॥ 17॥ 245

तं तत्र पतितं दृष्ट्वा सर्पभोगैर्निपीडितम्।
गोपा व्रजमुपागम्य चुक्रुशुः शोकलालसाः॥ 18॥ 246

गोपा ऊचुः

एष मोहं गतः कृष्णो मग्नो वै कालियह्रदे। 247
भक्ष्यते नागराजेन तमागच्छत पश्यत॥ 19॥

तच्छ्रुत्वा तत्र ते गोपा वज्रपातोपमं वचः। 248
गोप्यश्च त्वरिता जग्मुर्यशोदाप्रमुखा ह्रदम्॥ 20॥

हा हा क्वासाविति जनो गोपीनामतिविह्वलः। 249
यशोदया समं भ्रान्तो द्रुतप्रस्खलितं ययौ॥ 21॥

नन्दगोपश्च गोपाश्च रामश्चाद्भुतविक्रमः। 250
त्वरितं यमुनां जग्मुः कृष्णदर्शनलालसाः॥ 22॥

ददृशुश्चापि ते तत्र सर्पराजवशंगतम्। 251
निष्प्रयत्नीकृतं कृष्णं सर्पभोगविवेष्टितम्॥ 23॥

नन्दगोपोऽपि निश्चेष्टो न्यस्य पुत्रमुखे दृशम्। 252
यशोदा च महाभागा बभूव मुनिसत्तम॥ 24॥

गोप्यस्त्वन्या रुदन्त्यश्च ददृशुः शोककातराः। 253
प्रोचुश्च केशवं प्रीत्या भयकातर्यगद्गदम्॥ 25॥

गोप्य ऊचुः

सर्वा यशोदया सार्धं विशामोऽत्र महाह्रदम्। 254
सर्पराजस्य नो गन्तुमस्माभिर्युज्यते व्रजम्॥ 26॥

दिवसः को विना सूर्यं विना चन्द्रेण का निशा। 255
विना वृषेण का गावो विना कृष्णेन को व्रजः॥ 27॥

विनाकृता न यास्यामः कृष्णेनानेन गोकुलम्। 256
अरम्यं नातिसेव्यं च वारिहीनं यथा सरः॥ 28॥

यत्र नेन्दीवरदलश्यामकान्तिरयं हरिः।
तेनापि मातुर्वासेन रतिरस्तीति विस्मयः॥ 29॥ 257

उत्फुल्लपङ्कजदलस्पष्टकान्तिविलोचनम्।
अपश्यन्त्यो हरिं दीनाः कथं गोष्ठे भविष्यथ॥ 30॥ 258

अत्यन्तमधुरालापहृताशेषमनोरथम्।
न विना पुण्डरीकाक्षं यास्यामो नन्दगोकुलम्॥ 31॥ 259

भोगेनावेष्टितस्यापि सर्पराजस्य पश्यत।
स्मितशोभि मुखं गोप्यः कृष्णस्यास्मद्विलोकने॥ 32॥ 260

श्रीपराशर उवाच

इति गोपीवचः श्रुत्वा रौहिणेयो महाबलः।
गोपांश्च त्रासविधुरान्विलोक्य स्तिमितेक्षणान्॥ 33॥ 261

नन्दं च दीनमत्यर्थं न्यस्तदृष्टि सुताननेे।
मूर्च्छाकुलां यशोदां च कृष्णमाहात्मसंज्ञया॥ 34॥ 262

किमिदं देवदेवेश भावोऽयं मानुषस्त्वया।
व्यज्यतेऽत्यन्तमात्मानं किमनन्तं न वेत्सि यत्॥ 35॥ 263

त्वमेव जगतो नाभिरराणामिव संश्रयः।
कर्त्तापहर्त्ता पाता च त्रैलोक्यं त्वं त्रयीमयः॥ 36॥ 264

सेन्द्रै रुद्राग्निवसुभिरादित्यैर्मरुदश्विभिः।
चिन्त्यसे त्वमचिन्त्यात्मन् समस्तैश्चैव योगिभिः॥ 37॥ 265

जगत्यर्थं जगन्नाथ भारावतरणेच्छया।
अवतीर्णोऽसि मर्त्येषु तवांशश्चाहमग्रजः॥ 38॥ 266

मनुष्यलीलां भगवन् भजता भवता सुराः।
विडम्बयन्तस्त्वल्लीलां सर्व एव सहासते॥ 39॥ 267

अवतार्य भवान्पूर्वं गोकुले तु सुराङ्गनाः।
क्रीडार्थमात्मनः पश्चादवतीर्णोऽसि शाश्वत॥ 40॥ 268

अत्रावतीर्णयोः कृष्ण गोपा एव हि बान्धवाः।
गोप्यश्च सीदतः कस्मादेतान्बन्धूनुपेक्षसे॥ 41॥ 269

दर्शितो मानुषो भावो दर्शितं बालचापलम्।
तदयं दम्यतां कृष्ण दुष्टात्मा दशनायुधः॥ 42॥ 270

श्रीपराशर उवाच

इति संस्मारितः कृष्णः स्मितभिन्नोष्ठसम्पुटः।
आस्फोट्य मोचयामास स्वदेहं भोगिबन्धनात्॥ 43॥ 271

आनम्य चापि हस्ताभ्यामुभाभ्यां मध्यमं शिरः।
आरुह्याभुग्नशिरसः प्रणनर्त्तोरुविक्रमः॥ 44॥ 272

प्राणाः फणेऽभवंश्चास्य कृष्णस्याङ्घ्रिनिकुट्टनैः।
यत्रोन्नतिं च कुरुते ननामास्य ततश्शिरः॥ 45॥ 273

मूर्च्छामुपाययौ भ्रान्त्या नागः कृष्णस्य रेचकैः।
दण्डपातनिपातेन ववाम रुधिरं बहु॥ 46॥ 274

तं विभुग्नशिरोग्रीवमास्येभ्यस्रुतशोणितम्।
विलोक्यं करुणं जग्मुस्तत्पत्न्यो मधुसूदनम्॥ 47॥ 275

नागपत्न्य ऊचुः

ज्ञातोऽसि देवदेवेश सर्वज्ञस्त्वमनुत्तमः।
परं ज्योतिरचिन्त्यं यत्तदंशः परमेश्वरः॥ 48॥ 276

न समर्थाः सुरास्स्तोतुं यमनन्यभवं विभुम्।
स्वरूपवर्णनं तस्य कथं योषित्करिष्यति॥ 49॥ 277

यस्याखिलमहीव्योमजलाग्निपवनात्मकम्।
ब्रह्माण्डमल्पकाल्पांशः स्तोष्यामस्तं कथं वयम्॥ 50॥ 278

यतन्तो न विदुर्नित्यं यत्स्वरूपं हि योगिनः।
परमार्थमणोरल्पं स्थूलात्स्थूलं नताः स्म तम्॥ 51॥ 279

न यस्य जन्मने धाता यस्य चान्ताय नान्तकः।
स्थितिकर्त्ता न चान्योऽस्ति यस्य तस्मै नमस्सदा॥ 52॥ 280

कोपः स्वल्पोऽपि ते नास्ति स्थितिपालनमेव ते।
कारणं कालियस्यास्य दमने श्रूयतां वचः॥ 53॥ 281

स्त्रियोऽनुकम्प्यास्साधूनां मूढा दीनाश्च जन्तवः।
यतस्ततोऽस्य दीनस्य क्षम्यतां क्षमतां वर॥ 54॥ 282

समस्तजगदाधारो भवानल्पबलः फणी।
त्वत्पादपीडितो जह्यान्मुहूर्त्तार्द्धेन जीवितम्॥ 55॥ 283

क्व पन्नगोऽल्पवीर्योऽयं क्व भवान्भुवनाश्रयः।
प्रीतिद्वेषौ समोत्कृष्टगोचरौ भवतोऽव्यय॥ 56॥ 284

ततः कुरु जगत्स्वामिन्प्रसादमवसीदतः।
प्राणांस्त्यजति नागोऽयं भर्तृभिक्षा प्रदीयताम्॥ 57॥ 285

भुवनेश जगन्नाथ महापुरुष पूर्वज।
प्राणांस्त्यजति नागोऽयं भर्तृभिक्षां प्रयच्छ नः॥ 58॥ 286

वेदान्तवेद्य देवेश दुष्टदैत्यनिबर्हण।
प्राणांस्त्यजति नागोऽयं भर्तृभिक्षा प्रदीयताम्॥ 59॥ 287

श्रीपराशर उवाच

इत्युक्ते ताभिराश्वस्य क्लान्तदेहोऽपि पन्नगः।
प्रसीद देवदेवेति प्राह वाक्यं शनैः शनैः॥ **60**॥ 288

कालिय उवाच

तवाष्टगुणमैश्वर्यं नाथ स्वाभाविकं परम्।
निरस्तातिशयं यस्य तस्य स्तोष्यामि किन्वहम्॥ **61**॥ 289

त्वं परस्त्वं परस्याद्यः परं त्वत्तः परात्मक।
परस्मात्परमो यस्त्वं तस्य स्तोष्यामि किन्ह्वहम्॥ **62**॥ 290

यस्माद्ब्रह्मा च रुद्रश्च चन्द्रेन्द्रमरुदश्विनः।
वसवश्च सहादित्यैस्तस्य स्तोष्यामि किन्वहम्॥ **63**॥ 291

एकावयवसूक्ष्मांशो यस्यैतदखिलं जगत्।
कल्पनावयवस्यांशस्तस्य स्तोष्यामि किन्ह्वहम्॥ **64**॥ 292

सदसद्रूपिणो यस्य ब्रह्माद्यास्त्रिदशेश्वराः।
परमार्थं न जानन्ति तस्य स्तोष्यामि किन्वहम्॥ **65**॥ 293

ब्रह्माद्यैरर्चितो यस्तु गन्धपुष्पानुलेपनैः।
नन्दनादिसमुद्भूतैस्सोऽर्च्यते वा कथं मया॥ **66**॥ 294

यस्यावताररूपाणि देवराजस्सदार्चति।
न वेत्ति परमं रूपं सोऽर्च्यते वा कथं मया॥ **67**॥ 295

विषयेभ्यस्समावृत्य सर्वाक्षाणि च योगिनः।
यमर्चयन्ति ध्यानेन सोऽर्च्यते वा कथं मया॥ **68**॥ 296

हृदि संकल्प्य यद्रूपं ध्यानेनार्चन्ति योगिनः।
भावपुष्पादिना नाथः सोऽर्च्यते वा कथं मया॥ **69**॥ 297

सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च।
सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे॥ 70॥ 298

सर्पजातिरियं क्रूरा यस्यां जातोऽस्मि केशव।
तत्स्वभावोऽयमत्रास्ति नापराधो ममाच्युत॥ 71॥ 299

सृज्यते भवता सर्वं तथा संह्रियते जगत्।
जातिरूपस्वभावाश्च सृज्यन्ते सृजता त्वया॥ 72॥ 300

यथाहं भवता सृष्टो जात्या रूपेण चेश्वर।
स्वभावेन च संयुक्तस्तथेदं चेष्टितं मया॥ 73॥ 301

यद्यन्यथा प्रवर्तेयं देवदेव ततो मयि।
न्याय्यो दण्डनिपातो वै तवैव वचनं यथा॥ 74॥ 302

तथाप्यज्ञे जगत्स्वामिन्दण्डं पातितवान्मयि।
स श्लाघ्योऽयं परो दण्डस्त्वत्तो मे नान्यतो वरः॥ 75॥ 303

हतवीर्यो हतविषो दमितोऽहं त्वयाच्युत।
जीवितं दीयतामेकमाज्ञापय करोमि किम्॥ 76॥ 304

श्रीभगवानुवाच

नात्र स्थेयं त्वया सर्प कदाचिद्यमुनाजले।
सपुत्रपरिवारस्त्वं समुद्रसलिलं व्रज॥ 77॥ 305

मत्पदानि च ते सर्प दृष्ट्वा मूर्द्धनि सागरे।
गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति॥ 78॥ 306

श्रीपराशर उवाच

इत्युक्त्वा सर्पराजं तं मुमोच भगवान्हरिः।
प्रणम्य सोऽपि कृष्णाय जगाम पयसां निधिम्॥ 79॥ 307

पश्यतां सर्वभूतानां सभृत्यसुतबान्धवः।
समस्तभार्यासहितः परित्यज्य स्वकं ह्रदम्॥ **80**॥ 308

गते सर्पे परिष्वज्य मृतं पुनरिवागतम्।
गोपा मूर्द्धनि हार्देन सिषिचुर्नेत्रजैर्जलैः॥ **81**॥ 309

कृष्णमक्लिष्टकर्माणमन्ये विस्मितचेतसः।
तुष्टुवुर्मुदिता गोपा दृष्ट्वा शिवजलां नदीम्॥ **82**॥ 310

गीयमानः स गोपीभिश्चरितैस्साधुचेष्टितैः।
संस्तूयमानो गोपैश्च कृष्णो व्रजमुपागमत्॥ **83**॥ 311

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे सप्तमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे अष्टमोऽध्यायः ॥

श्रीपराशर उवाच

गाः पालयन्तौ च पुनः सहितौ बलकेशवौ।
भ्रममाणौ वने तस्मिन् रम्यं तालवनं गतौ॥ 1 ॥ 312

तत्तु तालवनं दिव्यं धेनुको नाम दानवः।
मृगमांसकृताहारः सदाध्यास्ते खराकृतिः॥ 2 ॥ 313

तत्तु तालवनं पक्वफलसम्पत्समन्वितम्।
दृष्ट्वा स्पृहान्विता गोपाः फलादानेऽब्रुवन्वचः॥ 3 ॥ 314

गोपा ऊचुः

हे राम हे कृष्ण सदा धेनुकेनैष रक्ष्यते।
भूप्रदेशो यतस्तस्मात्पक्वानीमानि सन्ति वै॥ 4 ॥ 315

फलानि पश्य तालानां गन्धामोदितदींशि वै।
वयमेतान्यभीप्सामः पात्यन्तां यदि रोचते॥ 5 ॥ 316

श्रीपराशर उवाच

इति गोपकुमाराणां श्रुत्वा संकर्षणो वचः।
एतत्कर्त्तव्यमित्युक्त्वा पातयामास तानि वै।
कृष्णश्च पातयामास भुवि तानि फलानि वै॥ 6 ॥ 317

फलानां पततां शब्दमाकर्ण्य सुदुरासदः।
आजगाम स दुष्टात्मा कोपाद्दैतेयगर्दभः॥ 7॥ 318

पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बलं बली।
जघानोरसि ताभ्यां च स च तेनाभ्यगृह्यत॥ 8॥ 319

गृहीत्वा भ्रामयामास सोऽम्बरे गतजीवितम्।
तस्मिन्नेव स चिक्षेप वेगेन तृणराजनि॥ 9॥ 320

ततः फलान्यनेकानि तालाग्रान्निपतन्खरः।
पृथिव्यां पातयामास महावातो घनानिव॥ 10॥ 321

अन्यानथ सजातीयानागतान्दैत्यगर्दभान्।
कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया॥ 11॥ 322

क्षणेनालङ्कृता पृथ्वी पक्वैस्तालफलैस्तदा।
दैत्यगर्दभदेहैश्च मैत्रेय शुशुभेऽधिकम्॥ 12॥ 323

ततो गावो निराबाधास्तस्मिंस्तालवने द्विज।
नवशष्पं सुखं चेरुर्यत्र भुक्तमभूत्पुरा॥ 13॥ 324

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे अष्टमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे नवमोऽध्यायः ॥

श्रीपराशर उवाच

तस्मिन् रासभदैतेये सानुगे विनिपातिते।
सौम्यं तद्गोपगोपीनां रम्यं तालवनं बभौ ॥ 1 ॥ 325

ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ।
हत्वा धेनुकदैतेयं भाण्डीरवटमागतौ ॥ 2 ॥ 326

क्ष्वेलमानौ प्रगायन्तौ विचिन्वन्तौ च पादपान्।
चारयन्तौ च गा दूरे व्याहरन्तौ च नामभिः ॥ 3 ॥ 327

निर्योगपाशस्कन्धौ तौ वनमालाविभूषितौ।
शुशुभाते महात्मानौ बालशृङ्गाविवर्षभौ ॥ 4 ॥ 328

सुवर्णाञ्जनचूर्णाभ्यां तौ तदा रूषिताम्बरौ।
महेन्द्रायुधसंयुक्तौ श्वेतकृष्णाविवाम्बुदौ ॥ 5 ॥ 329

चेरतुर्लोकसिद्धाभिः क्रीडाभिरितरेतरम्।
समस्तलोकनाथानां नाथभूतौ भुवं गतौ ॥ 6 ॥ 330

मनुष्यधर्माभिरतौ मानयन्तौ मनुष्यताम्।
तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनम् ॥ 7 ॥ 331

ततस्त्वान्दोलिकाभिश्च नियुद्धैश्च महाबलौ।
व्यायामं चक्रतुस्तत्र क्षेपणीयैस्तथाश्मभिः ॥ 8 ॥ 332

तल्लिप्सुरसुरस्तत्र ह्युभयो रममाणयोः।
आजगाम प्रलम्बाख्यो गोपवेषतिरोहितः॥ 9॥ 333

सोऽवगाहत निश्शंकस्तेषां मध्यममानुषः।
मानुषं वपुरास्थाय प्रलम्बो दानवोत्तमः॥ 10॥ 334

तयोश्छिद्रान्तरप्रेप्सुरविषह्यममन्यत।
कृष्णं ततो रौहिणेयं हन्तुं चक्रे मनोरथम्॥ 11॥ 335

हरिणाक्रीडनं नाम बालक्रीडनकं ततः।
प्रकुर्वन्तो हि ते सर्वे द्वौ द्वौ युगपदुत्थितौ॥ 12॥ 336

श्रीदाम्ना सह गोविन्दः प्रलम्बेन तथा बलः।
गोपालैरपरैश्चान्ये गोपालाः पुप्लुवुस्ततः॥ 13॥ 337

श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः।
जितवान्कृष्णपक्षीयैर्गोपैरन्ये पराजिताः॥ 14॥ 338

ते वाहयन्तस्त्वन्योन्यं भाण्डीरं वटमेत्य वै।
पुनर्निववृतुस्सर्वे ये ये तत्र पराजिताः॥ 15॥ 339

सङ्कर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः।
नभस्स्थलं जगामाशु सचन्द्र इव वारिदः॥ 16॥ 340

असहन् रौहिणेयस्य स भारं दानवोत्तमः।
ववृधे स महाकायः प्रावृषीव बलाहकः॥ 17॥ 341

सङ्कर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिम्।
स्रग्दामलम्बाभरणं मुकुटाटोपमस्तकम्॥ 18॥ 342

रौद्रं शकटचक्राक्षं पादन्यासचलत्क्षितिम्।
अभीतमनसा तेन रक्षसा रोहिणीसुतः।
ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत्॥ 19॥ 343

कृष्ण कृष्ण ह्रिये ह्येष पर्वतोदग्रमूर्त्तिना।
केनापि पश्य दैत्येन गोपालच्छद्मरूपिणा॥ 20॥ 344

यदत्र साम्प्रतं कार्यं मया मधुनिषूदन।
तत्कथ्यतां प्रयात्येष दुरात्मातित्वरान्वितः॥ 21॥ 345

श्रीपराशर उवाच

तमाह रामं गोविन्दः स्मितभिन्नोष्ठसम्पुटः।
महात्मा रौहिणेयस्य बलवीर्यप्रमाणवित्॥ 22॥ 346

श्रीकृष्ण उवाच

किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते।
सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया॥ 23॥ 347

स्मराशेषजगद्बीजकारणं कारणाग्रजम्।
आत्मानमेकं तद्वच्च जगत्येकार्णवे च यत्॥ 24॥ 348

किं न वेत्सि यथाहं च त्वं चैकं कारणं भुवः।
भारावतारणार्थाय मर्त्यलोकमुपागतौ॥ 25॥ 349

नभश्शिरस्तेऽम्बुवहाश्च केशाः
पादौ क्षितिर्वक्त्रमनन्त वह्निः।
सोमो मनस्ते श्वसितं समीरणो
दिशश्चतस्रोऽव्यय बाहवस्ते॥ 26॥ 350

सहस्रवक्त्रो भगवन्महात्मा
सहस्रहस्ताङ्घ्रिशरीरभेदः।
सहस्रपद्मोद्भवयोनिराद्य -
स्सहस्रशस्त्वां मुनयो गृणन्ति॥ **27**॥ 351

दिव्यं हि रूपं तव वेत्ति नान्यो
देवैरशेषैरवताररूपम्।
तदर्च्यते वेत्सि न किं यदन्ते
त्वय्येव विश्वं लयमभ्युपैति॥ **28**॥ 352

त्वया धृतेयं धरणी बिभर्ति
चराचरं विश्वमनन्तमूर्ते।
कृतादिभेदैरज कालरूपो
निमेषपूर्वो जगदेतदत्सि॥ **29**॥ 353

अत्तं यथा बाडववह्निनाम्बु
हिमस्वरूपं परिगृह्य कास्तम्।
हिमाचले भानुमतोंऽशुसंगा -
ज्जलत्वमभ्येति पुनस्तदेव॥ **30**॥ 354

एवं त्वया संहरणेऽत्तमेत -
ज्जगत्समस्तं त्वदधीनकं पुनः।
तवैव सर्गाय समुद्यतस्य
जगत्त्वमभ्येत्यनुकल्पमीश॥ **31**॥ 355

भवानहं च विश्वात्मन्नेकमेव च कारणम्।
जगतोऽस्य जगत्यर्थे भेदेनावां व्यवस्थितौ॥ **32**॥ 356

तत्स्मर्यतामममेयात्मंस्त्वयात्मा जहि दानवम्।
मानुष्यमेवावलम्ब्य बन्धूनां क्रियतां हितम्॥ **33**॥ 357

श्रीपराशर उवाच

इति संस्मारितो विप्र कृष्णेन सुमहात्मना।
विहस्य पीडयामास प्रलम्बं बलवान्बलः॥ 34॥ 358

मुष्टिना सोऽहनन्मूर्ध्नि कोपसंरक्तलोचनः।
तेन चास्य प्रहारेण बहिर्याते विलोचने॥ 35॥ 359

स निष्कासितमस्तिष्को मुखाच्छोणितमुद्वमन्।
निपपात महीपृष्ठे दैत्यवर्यो ममार च॥ 36॥ 360

प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्मणा।
प्रहृष्टास्तुष्टुवुर्गोपास्साधुसाध्विति चाब्रुवन्॥ 37॥ 361

संस्तूयमानो गोपैस्तु रामो दैत्ये निपातिते।
प्रलम्बे सह कृष्णेन पुनर्गोकुलमाययौ॥ 38॥ 362

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे नवमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे दशमोऽध्यायः ॥

श्रीपराशर उवाच

तयोर्विहरतोरेवं रामकेशवयोर्व्रजे।
प्रावृड् व्यतीता विकसत्सरोजा चाभवच्छरत्॥ 1॥ 363

अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके।
पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही॥ 2॥ 364

मयूरा मौनमातस्थुः परित्यक्तमदा वने।
असारतां परिज्ञाय संसारस्येव योगिनः॥ 3॥ 365

उत्सृज्य जलसर्वस्वं विमलास्सितमूर्त्तयः।
तत्यजुश्चाम्बरं मेघा गृहं विज्ञानिनो यथा॥ 4॥ 366

शरत्सूर्यांशुतप्तानि ययुश्शोषं सरांसि च।
बह्वालम्बममत्वेन हृदयानीव देहिनाम्॥ 5॥ 367

कुमुदैश्शरदम्भांसि योग्यतालक्षणं ययुः।
अवबोधैर्मनांसीव समत्वममलात्मनाम्॥ 6॥ 368

तारकाविमले व्योम्नि रराजाखण्डमण्डलः।
चन्द्रश्चरमदेहात्मा योगी साधुकुले यथा॥ 7॥ 369

शनकैश्शनकैस्तीरं तत्यजुश्च जलाशयाः।
ममत्वं क्षेत्रपुत्रादिरूढमुच्चैर्यथा बुधाः॥ 8॥ 370

पूर्वं त्यक्तैस्सरोऽम्भोभिर्हसा योगं पुनर्ययुः।
क्लेशैः कुयोगिनोऽशेषैरन्तरायहता इव॥ 9॥ 371

निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः।
क्रमावाप्तमहायोगो निश्चलात्मा यथा यतिः॥ 10॥ 372

सर्वत्रातिप्रसन्नानि सलिलानि तथाभवन्।
ज्ञाते सर्वगते विष्णौ मनांसीव सुमेधसाम्॥ 11॥ 373

बभूव निर्मलं व्योम शरदा ध्वस्ततोयदम्।
योगाग्निदग्धक्लेशौघं योगिनामिव मानसम्॥ 12॥ 374

सूर्यांशुजनितं तापं निन्ये तारापतिः शमम्।
अहंमानोद्भवं दुःखं विवेकः सुमहानिव॥ 13॥ 375

नभसोऽब्दं भुवः पङ्कं कालुष्यं चाम्भसश्शरत्।
इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहार इवाहरत्॥ 14॥ 376

प्राणायाम इवाम्भोभिस्सरसां कृतपूरकैः।
अभ्यस्यतेऽनुदिवसं रेचकाकुम्भकादिभिः॥ 15॥ 377

विमलाम्बरनक्षत्रे काले चाभ्यागते व्रजे।
ददर्शेन्द्रमहारम्भायोद्यतांस्तान्व्रजौकसः॥ 16॥ 378

कृष्णस्तानुत्सुकान्दृष्ट्वा गोपानुत्सवलालसान्।
कौतूहलादिदं वाक्यं प्राह वृद्धान्महामतिः॥ 17॥ 379

कोऽयं शक्रमखो नाम येन वो हर्ष आगतः।
प्राह तं नन्दगोपश्च पृच्छन्तमतिसादरम्॥ 18॥ 380

नन्दगोप उवाच

मेघानां पयसां चेशो देवराजश्शतक्रतुः।
तेन सञ्चोदिता मेघा वर्षन्त्यम्बुमयं रसम्॥ 19॥ 381

तद्वृष्टिजनितं सस्यं वयमन्ये च देहिनः।
वर्त्तयामोपयुञ्जानास्तर्पयामश्च देवताः॥ 20॥ 382

क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः।
तेन संवर्द्धितैस्सस्यैस्तुष्टाः पुष्टा भवन्ति वै॥ 21॥ 383

नासस्या नातृणा भूमिर्न बुभुक्षार्दितो जनः।
दृश्यते यत्र दृश्यन्ते वृष्टिमन्तो बलाहकाः॥ 22॥ 384

भौममेतत्पयो दुग्धं गोभिः सूर्यस्य वारिदैः।
पर्जन्यस्सर्वलोकस्योद्भवाय भुवि वर्षति॥ 23॥ 385

तस्मात्प्रावृषि राजानस्सर्वे शक्रं मुदा युताः।
मखैस्सुरेशमर्चन्ति वयमन्ये च मानवाः॥ 24॥ 386

श्रीपराशर उवाच

नन्दगोपस्य वचनं श्रुत्वेत्थं शक्रपूजने।
रोषाय त्रिदशेन्द्रस्य प्राह दामोदरस्तदा॥ 25॥ 387

न वयं कृषिकर्त्तारो वाणिज्याजीविनो न च।
गावोऽस्मद्दैवतं तात वयं वनचरा यतः॥ 26॥ 388

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथा परा।
विद्या चतुष्टयं चैतद्वार्त्तामात्रं शृणुष्व मे॥ 27॥ 389

कृषिर्वणिज्या तद्वच्च तृतीयं पशुपालनम्।
विद्या ह्येका महाभाग वार्त्ता वृत्तित्रयाश्रया॥ 28॥ 390

कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनाम्।
अस्माकं गौः परा वृत्तिर्वार्त्ताभेदैरियं त्रिभिः॥ 29॥ 391

विद्यया यो यया युक्तस्तस्य सा दैवतं महत्।
सैव पूज्यार्चनीया च सैव तस्योपकारिका॥ 30॥ 392

यो यस्य फलमश्नन्वै पूजयत्यपरं नरः।
इह च प्रेत्य चैवासौ न तदाप्नोति शोभनम्॥ 31॥ 393

कृष्यान्ता प्रथिता सीमा सीमान्तं च पुनर्वनम्।
वनान्ता गिरयस्सर्वे ते चास्माकं परा गतिः॥ 32॥ 394

न द्वारबन्धावरणा न गृहक्षेत्रिणस्तथा।
सुखिनस्त्वखिले लोके यथा वै चक्रचारिणः॥ 33॥ 395

श्रूयन्ते गिरयश्चैव वनेऽस्मिन्कामरूपिणः।
तत्तद्रूपं समास्थाय रमन्ते स्वेषु सानुषु॥ 34॥ 396

यदा चैतैः प्रबाध्यन्ते तेषां ये काननौकसः।
तदा सिंहादिरूपैस्तान्घातयन्ति महीधराः॥ 35॥ 397

गिरियज्ञस्त्वयं तस्माद्गोयज्ञश्च प्रवर्त्यताम्।
किमस्माकं महेन्द्रेण गावश्शैलाश्च देवताः॥ 36॥ 398

मन्त्रयज्ञपरा विप्रास्सीरयज्ञाश्च कर्षकाः।
गिरिगोयज्ञशीलाश्च वयमद्रिवनाश्रयाः॥ 37॥ 399

तस्माद्गोवर्धनश्शैलो भवद्भिर्विविधार्हणैः।
अर्च्यतां पूज्यतां मेध्यान्पशून्हत्वा विधानतः॥ 38॥ 400

सर्वघोषस्य सन्दोहो गृह्यतां मा विचार्यताम्।
भोज्यन्तां तेन वै विप्रास्तथा ये चाभिवाञ्छकाः॥ 39॥ 401

तत्रार्चिते कृते होमे भोजितेषु द्विजातिषु।
शरत्पुष्पकृतापीडाः परिगच्छन्तु गोगणाः॥ **40**॥ 402

एतन्मम मतं गोपास्सम्प्रीत्या क्रियते यदि।
ततः कृता भवेत्प्रीतिर्गवामद्रेस्तथा मम॥ **41**॥ 403

श्रीपराशर उवाच

इति तस्य वचः श्रुत्वा नन्दाद्यास्ते व्रजौकसः।
प्रीत्युत्फुल्लमुखा गोपास्साधुसाध्वित्यथाब्रुवन्॥ **42**॥ 404

शोभनं ते मतं वत्स यदेतद्भवतोदितम्।
तत्करिष्यामहे सर्वं गिरियज्ञः प्रवर्त्यताम्॥ **43**॥ 405

तथा च कृतवन्तस्ते गिरियज्ञं व्रजौकसः।
दधिपायसमांसाद्यैर्ददुश्शैलबलिं ततः॥ **44**॥ 406

द्विजांश्च भोजयामासुश्शतशोऽथ सहस्रशः॥ **45**॥ 407

गावश्शैलं ततश्चक्रुरर्चितास्ताः प्रदक्षिणम्।
वृषभाश्चातिनर्दन्तस्सतोया जलदा इव॥ **46**॥ 408

गिरिमूर्द्धनि कृष्णोऽपि शैलोऽहमिति मूर्तिमान्।
बुभुजेऽन्नं बहुतरं गोपवर्याहृतं द्विज॥ **47**॥ 409

स्वेनैव कृष्णो रूपेण गोपैस्सह गिरेश्शिरः।
अधिरुह्यार्चयामास द्वितीयामात्मनस्तनुम्॥ **48**॥ 410

अन्तर्द्धानं गते तस्मिन्गोपा लब्ध्वा ततो वरान्।
कृत्वा गिरिमखं गोष्ठं निजमभ्याययुः पुनः॥ **49**॥ 411

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे दशमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे एकादशोऽध्यायः ॥

श्रीपराशर उवाच

मखे प्रतिहते शक्रो मैत्रेयातिरुषान्वितः।
संवर्तकं नाम गणं तोयदानामथाब्रवीत्॥ 1॥ 412

भो भो मेघा निशम्यैतद्वचनं गदतो मम।
आज्ञानन्तरमेवाशु क्रियतामविचारितम्॥ 2॥ 413

नन्दगोपस्सुदुर्बुद्धिर्गोपैरन्यैस्सहायवान्।
कृष्णाश्रयबलाध्मातो मखभङ्गमचीकरत्॥ 3॥ 414

आजीवो याः परस्तेषां गावस्तस्य च कारणम्।
ता गावो वृष्टिवातेन पीड्यन्तां वचनान्मम॥ 4॥ 415

अहमप्यद्रिशृङ्गाभं तुङ्गमारुह्य वारणम्।
साहाय्यं वः करिष्यामि वाय्वम्बूत्सर्गयोजितम्॥ 5॥ 416

श्रीपराशर उवाच

इत्याज्ञप्तास्ततस्तेन मुमुचुस्ते बलाहकाः।
वातवर्षं महाभीममभावाय गवां द्विज॥ 6॥ 417

ततः क्षणेन पृथिवी ककुभोऽम्बरमेव च।
एकं धारामहासारपूरणेनाभवन्मुने॥ 7॥ 418

विद्युल्लताकशाघातत्रस्तैरिव घनैर्घनम्।
नादापुरितदिक्चक्रैर्धारासारमपात्यत॥ 8॥ 419

अन्धकारीकृते लोके वर्षद्भिरनिशं घनैः।
अधश्चोर्ध्वं च तिर्यक् च जगदाप्यमिवाभवत्॥ 9॥ 420

गावस्तु तेन पतता वर्षवातेन वेगिना।
धूताः प्राणाञ्जहुस्सन्नत्रिकसक्थिशिरोधराः॥ 10॥ 421

क्रोडेन वत्सानाक्रम्य तस्थुरन्या महामुने।
गावो विवत्साश्च कृता वारिपूरेण चापराः॥ 11॥ 422

वत्साश्च दीनवदना वातकम्पितकन्धराः।
त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवातुराः॥ 12॥ 423

ततस्तद्गोकुलं सर्वं गोगोपीगोपसङ्कुलम्।
अतीवार्त्तं हरिर्दृष्ट्वा मैत्रेयाचिन्तयत्तदा॥ 13॥ 424

एतत्कृतं महेन्द्रेण मखभंगविरोधिना।
तदेतदखिलं गोष्ठं त्रातव्यमधुना मया॥ 14॥ 425

इममद्रिमहं धैर्यादुत्पाट्योरुशिलाघनम्।
धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि॥ 15॥ 426

श्रीपराशर उवाच

इति कृत्वा मतिं कृष्णो गोवर्धनमहीधरम्।
उत्पाट्यैककरेणैव धारयामास लीलया॥ 16॥ 427

गोपांश्चाह हसञ्छौरिस्समुत्पाटितभूधरः।
विशध्वमत्र त्वरिताः कृतं वर्षनिवारणम्॥ 17॥ 428

सुनिवातेषु देशेषु यथा जोषमिहास्यताम्।
प्रविश्यतां न भेतव्यं गिरिपाताच्च निर्भयैः॥ **18**॥ 429

इत्युक्तास्तेन ते गोपा विविशुर्गोधनैस्सह।
शकटारोपितैर्भाण्डैर्गोप्यश्चासारपीडिताः॥ **19**॥ 430

कृष्णोऽपि तं दधारैव शैलमत्यन्तनिश्चलम्।
व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः॥ **20**॥ 431

गोपगोपीजनैर्हृष्टैः प्रीतिविस्तारितेक्षणैः।
संस्तूयमानचरितः कृष्णश्शैलमधारयत्॥ **21**॥ 432

सप्तरात्रं महामेघा ववर्षुर्नन्दगोकुले।
इन्द्रेण चोदिता विप्र गोपानां नाशकारिणा॥ **22**॥ 433

ततो धृते महाशैले परित्राते च गोकुले।
मिथ्याप्रतिज्ञो बलभिद्वारयामास तान्घनान्॥ **23**॥ 434

व्यभ्रे नभसि देवेन्द्रे वितथात्मवचस्यथ।
निष्क्रम्य गोकुलं हृष्टं स्वस्थानं पुनरागमत्॥ **24**॥ 435

मुमोच कृष्णोऽपि तदा गोवर्धनमहाचलम्।
स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजौकसैः॥ **25**॥ 436

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे एकादशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे द्वादशोऽध्यायः ॥

श्रीपराशर उवाच

धृते गोवर्धने शैले परित्राते च गोकुले।
रोचयामास कृष्णस्य दर्शनं पाकशासनः॥ 1 ॥ 437

सोऽधिरुह्य महानागमैरावतममित्रजित्।
गोवर्धनगिरौ कृष्णं ददर्श त्रिदशेश्वरः॥ 2 ॥ 438

चारयन्तं महावीर्यं गास्तु गोपवपुर्धरम्।
कृत्स्नस्य जगतो गोपं वृतं गोपकुमारकैः॥ 3 ॥ 439

गरुडं च ददर्शोच्चैरन्तर्द्धानगतं द्विज।
कृतच्छायं हरेर्मूर्ध्नि पक्षाभ्यां पक्षिपुङ्गवम्॥ 4 ॥ 440

अवरुह्य स नागेन्द्रादेकान्ते मधुसूदनम्।
शक्रस्सस्मितमाहेदं प्रीतिविस्तारितेक्षणः॥ 5 ॥ 441

इन्द्र उवाच

कृष्ण कृष्ण शृणुष्वेदं यदर्थमहमागतः।
त्वत्समीपं महाबाहो नैतच्चिन्त्यं त्वयान्यथा॥ 6 ॥ 442

भारावतारणार्थाय पृथिव्याः पृथिवीतले।
अवतीर्णोऽखिलाधार त्वमेव परमेश्वर॥ 7 ॥ 443

मखभंगविरोधेन मया गोकुलनाशकाः।
समादिष्टा महामेघास्तैश्चेदं कदनं कृतम्॥ 8॥ 444

त्रातास्ताश्च त्वया गावस्समुत्पाट्य महीधरम्।
तेनाहं तोषितो वीरकर्मणात्यद्भुतेन ते॥ 9॥ 445

साधितं कृष्ण देवानामहं मन्ये प्रयोजनम्।
त्वयायमद्रिप्रवरः करेणैकेन यद्धृतः॥ 10॥ 446

गोभिश्च चोदितः कृष्ण त्वत्सकाशमिहागतः।
त्वया त्राताभिरत्यर्थं युष्मत्सत्कारकारणात्॥ 11॥ 447

स त्वां कृष्णाभिषेक्ष्यामि गवां वाक्यप्रचोदितः।
उपेन्द्रत्वे गवामिन्द्रो गोविन्दस्त्वं भविष्यसि॥ 12॥ 448

श्रीपराशर उवाच

अथोपवाह्यादादाय घण्टामैरावताद्गजात्।
अभिषेकं तया चक्रे पवित्रजलपूर्णया॥ 13॥ 449

क्रियमाणेऽभिषेके तु गावः कृष्णस्य तत्क्षणात्।
प्रस्रवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुन्धराम्॥ 14॥ 450

अभिषिच्य गवां वाक्यादुपेन्द्रं वै जनार्दनम्।
प्रीत्या सप्रश्रयं वाक्यं पुनराह शचीपतिः॥ 15॥ 451

गवामेतत्कृतं वाक्यं तथान्यदपि मे शृणु।
यद्ब्रवीमि महाभाग भारावतरणेच्छया॥ 16॥ 452

ममांशः पुरुषव्याघ्र पृथिव्यां पृथिवीधर।
अवतीर्णोऽर्जुनो नाम संरक्ष्यो भवता सदा॥ 17॥ 453

भारावतरणे साह्यं स ते वीरः करिष्यति।
संरक्षणीयो भवता यथात्मा मधुसूदन॥ 18॥ 454

श्रीभगवानुवाच

जानामि भारते वंशे जातं पार्थं तवांशतः।
तमहं पालयिष्यामि यावत्स्थास्यामि भूतले॥ 19॥ 455

यावन्महीतले शक्र स्थास्याम्यहमरिन्दम।
न तावदर्जुनं कश्चिद्देवेन्द्र युधि जेष्यति॥ 20॥ 456

कंसो नाम महाबाहुर्दैत्योऽरिष्टस्तथासुरः।
केशी कुवलयापीडो नरकाद्यास्तथा परे॥ 21॥ 457

हतेषु तेषु देवेन्द्र भविष्यति महाहवः।
तत्र विद्धि सहस्राक्ष भारावतरणं कृतम्॥ 22॥ 458

स त्वं गच्छ न सन्तापं पुत्रार्थे कर्तुमर्हसि।
नार्जुनस्य रिपुः कश्चिन्ममाग्रे प्रभविष्यति॥ 23॥ 459

अर्जुनार्थे त्वहं सर्वान्युधिष्ठिरपुरोगमान्।
निवृत्ते भारते युद्धे कुन्त्यै दास्याम्यविक्षतान्॥ 24॥ 460

श्रीपराशर उवाच

इत्युक्तः सम्परिष्वज्य देवराजो जनार्दनम्।
आरुह्यैरावतं नागं पुनरेव दिवं ययौ॥ 25॥ 461

कृष्णो हि सहितो गोभिर्गोपालैश्च पुनर्व्रजम्।
आजगामाथ गोपीनां दृष्टिपूतेन वर्त्मना॥ 26॥ 462

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे द्वादशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे त्रयोदशोऽध्यायः ॥

श्रीपराशर उवाच

गते शक्रे तु गोपालाः कृष्णमक्लिष्टकारिणम्।
ऊचुः प्रीत्या धृतं दृष्ट्वा तेन गोवर्धनाचलम्॥ 1 ॥ 463

वयमस्मान्महाभाग भगवन्महतो भयात्।
गावश्च भवता त्राता गिरिधारणकर्मणा॥ 2 ॥ 464

बालक्रीडेयमतुला गोपालत्वं जुगुप्सितम्।
दिव्यं च भवतः कर्म किमेतत्तात कथ्यताम्॥ 3 ॥ 465

कालियो दमितस्तोये धेनुको विनिपातितः।
धृतो गोवर्धनश्चायं शङ्कितानि मनांसि नः॥ 4 ॥ 466

सत्यं सत्यं हरेः पादौ शपामोऽमितविक्रम।
यथावद्वीर्यमालोक्य न त्वां मन्यामहे नरम्॥ 5 ॥ 467

प्रीतिः सस्त्रीकुमारस्य व्रजस्य त्वयि केशव।
कर्म चेदमशक्यं यत्समस्तैस्त्रिदशैरपि॥ 6 ॥ 468

बालत्वं चातिवीर्यत्वं जन्म चास्मास्वशोभनम्।
चिन्त्यमानममेयात्मञ्छङ्का कृष्ण प्रयच्छति॥ 7 ॥ 469

देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा।
किमस्माकं विचारेण बान्धवोऽसि नमोऽस्तु ते॥ 8 ॥ 470

श्रीपराशर उवाच

क्षणं भूत्वा त्वसौ तूष्णीं किञ्चित्प्रणयकोपवान्।
इत्येवमुक्तस्तैर्गोपैः कृष्णोऽप्याह महामतिः॥ 9॥ 471

श्रीभगवानुवाच

मत्सम्बन्धेन वो गोपा यदि लज्जा न जायते।
श्लाघ्यो वाहं ततः किं वो विचारेण प्रयोजनम्॥ 10॥ 472

यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि।
तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि॥ 11॥ 473

नाहं देवो न गन्धर्वो न यक्षो न च दानवः।
अहं वो बान्धवो जातो नैतच्चिन्त्यमितोऽन्यथा॥ 12॥ 474

श्रीपराशर उवाच

इति श्रुत्वा हरेर्वाक्यं बद्धमौनास्ततो वनम्।
ययुर्गोपा महाभाग तस्मिन्प्रणयकोपिनि॥ 13॥ 475

कृष्णस्तु विमलं व्योम शरच्चन्द्रस्य चन्द्रिकाम्।
तदा कुमुदिनीं फुल्लामामोदितदिगन्तराम्॥ 14॥ 476

वनराजिं तथा कूजद्भृङ्गमालामनोहराम्।
विलोक्य सह गोपीभिर्मनश्चक्रे रतिं प्रति॥ 15॥ 477

विना रामेण मधुरमतीव वनिताप्रियम्।
जगौ कलपदं शौरिस्तारमन्द्रकृतक्रमम्॥ 16॥ 478

रम्यं गीतध्वनिं श्रुत्वा सन्त्यज्यावसथांस्तदा।
आजग्मुस्त्वरिता गोप्यो यत्रास्ते मधुसूदनः॥ 17॥ 479

शनैश्शनैर्जगौ गोपी काचित्तस्य लयानुगम्।
दत्तावधाना काचिच्च तमेव मनसास्मरत्॥ 18॥ 480

काचित्कृष्णेति कृष्णेति प्रोच्य लज्जामुपाययौ।
ययौ च काचित्प्रेमान्धा तत्पार्श्वमविलम्बितम्॥ 19॥ 481

काचिच्चावसथस्यान्ते स्थित्वा दृष्ट्वा बहिर्गुरुम्।
तन्मयत्वेन गोविन्दं दध्यौ मीलितलोचना॥ 20॥ 482

तच्चित्तविमलाह्लादक्षीणपुण्यचया तथा।
तदप्राप्तिमहादुःखविलीनाशेषपातका॥ 21॥ 483

चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ 22॥ 484

गोपीपरिवृतो रात्रिं शरच्चन्द्रमनोरमाम्।
मानयामास गोविन्दो रासारम्भरसोत्सुकः॥ 23॥ 485

गोप्यश्च वृन्दशः कृष्णचेष्टास्वायत्तमूर्तयः।
अन्यदेशं गते कृष्णे चेरुर्वृन्दावनान्तरम्॥ 24॥ 486

कृष्णे निबद्धहृदया इदमूचुः परस्परम्॥ 25॥ 487

कृष्णोऽहमेष ललितं व्रजाम्यालोक्यतां गतिः।
अन्या ब्रवीति कृष्णस्य मम गीतिर्निशम्यताम्॥ 26॥ 488

दुष्टकालिय तिष्ठात्र कृष्णोऽहमिति चापरा।
बाहुमास्फोट्य कृष्णस्य लीलया सर्वमाददे॥ 27॥ 489

अन्या ब्रवीति भो गोपा निश्शंकैः स्थीयतामिति।
अलं वृष्टिभयेनात्र धृतो गोवर्धनो मया॥ 28॥ 490

धेनुकोऽयं मया क्षिप्तो विचरन्तु यथेच्छया।
गावो ब्रवीति चैवान्या कृष्णलीलानुसारिणी॥ 29॥ 491

एवं नानाप्रकारासु कृष्णचेष्टासु तास्तदा।
गोप्यो व्यग्राः समं चेरू रम्यं वृन्दावनान्तरम्॥ 30॥ 492

विलोक्यैका भुवं प्राह गोपी गोपवराङ्गना।
पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला॥ 31॥ 493

ध्वजवज्राङ्कुशाब्जाङ्क रेखावन्त्यालि पश्यत।
पदान्येतानि कृष्णस्य लीलाललितगामिनः॥ 32॥ 494

कापि तेन समायाता कृतपुण्या मदालसा।
पदानि तस्याश्चैतानि घनान्यल्पतनूनि च॥ 33॥ 495

पुष्पापचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम्।
येनाग्राक्रान्तमात्राणि पदान्यत्र महात्मनः॥ 34॥ 496

अत्रोपविश्य वै तेन काचित्पुष्पैरलंकृता।
अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितस्तया॥ 35॥ 497

पुष्पबन्धनसम्मानकृतमानामपास्य ताम्।
नन्दगोपसुतो यातो मार्गेणानेन पश्यत॥ 36॥ 498

अनुयातैनमत्रान्या नितम्बभरमन्थरा।
या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः॥ 37॥ 499

हस्तन्यस्ताग्रहस्तेयं तेन याति तथा सखी।
अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः॥ 38॥ 500

हस्तसंस्पर्शमात्रेण धूर्तेनैषा विमानिता।
नैराश्यान्मन्दगामिन्या निवृत्तं लक्ष्यते पदम्॥ 39॥ 501

नूनमुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकम्।
तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः॥ **40**॥ 502

प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते।
निवर्तध्वं शशाङ्कस्य नैतद्दीधितिगोचरे॥ **41**॥ 503

निवृत्तास्तास्तदा गोप्यो निराशाः कृष्णदर्शने।
यमुनातीरमासाद्य जगुस्तच्चरितं तथा॥ **42**॥ 504

ततो ददृशुरायान्तं विकासिमुखपंकजम्।
गोप्यस्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टचेष्टितम्॥ **43**॥ 505

काचिदालोक्य गोविन्दमायान्तमतिहर्षिता।
कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदीरयत्॥ **44**॥ 506

काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम्।
विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपंकजम्॥ **45**॥ 507

काचिदालोक्य गोविन्दं निमीलितविलोचना।
तस्यैव रूपं ध्यायन्ती योगारूढेव सा बभौ॥ **46**॥ 508

ततः काञ्चित्प्रियालापैः काञ्चिद्भ्रूभङ्गवीक्षितैः।
निन्येऽनुनयमन्यां च करस्पर्शेन माधवः॥ **47**॥ 509

ताभिः प्रसन्नचित्ताभिर्गोपीभिस्सह सादरम्।
ररास रासगोष्ठीभिरुदारचरितो हरिः॥ **48**॥ 510

रासमण्डलबन्धोऽपि कृष्णपार्श्वमनुज्झता।
गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना॥ **49**॥ 511

हस्तेन गृह्य चैकैकां गोपीनां रासमण्डलम्।
चकार तत्करस्पर्शनिमीलितदृशं हरिः॥ **50**॥ 512

ततः प्रववृते रासश्चलद्वलयनिस्वनः।
अनुयातशरत्काव्यगेयगीतिरनुक्रमात्॥ **51**॥ 513

कृष्णश्शरच्चन्द्रमसं कौमुदीं कुमुदाकरम्।
जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः॥ **52**॥ 514

परिवृत्तिश्रमेणैका चलद्वलयलापिनीम्।
ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः॥ **53**॥ 515

काचित्प्रविलसद्बाहुः परिरभ्य चुचुम्ब तम्।
गोपी गीतस्तुतिव्याजान्निपुणा मधुसूदनम्॥ **54**॥ 516

गोपीकपोलसंश्लेषमभिगम्य हरेर्भुजौ।
पुलकोद्गमसस्याय स्वेदाम्बुघनतां गतौ॥ **55**॥ 517

रासगेयं जगौ कृष्णो यावत्तारतरध्वनिः।
साधु कृष्णेति कृष्णेति तावत्ता द्विगुणं जगुः॥ **56**॥ 518

गतेऽनुगमनं चक्रुर्वलने सम्मुखं ययुः।
प्रतिलोमानुलोमाभ्यां भेजुर्गोपाङ्गना हरिम्॥ **57**॥ 519

स तथा सह गोपीभी ररास मधुसूदनः।
यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभवत्॥ **58**॥ 520

ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृभिस्तथा।
कृष्णं गोपाङ्गना रात्रौ रमयन्ति रतिप्रियाः॥ **59**॥ 521

सोऽपि कैशोरकवयो मानयन्मधुसूदनः।
रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः॥ **60**॥ 522

तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः।
आत्मस्वरूपरूपोऽसौ व्यापी वायुरिव स्थितः॥ **61**॥ 523

यथा समस्तभूतेषु नभोऽग्निः पृथिवी जलम्।
वायुश्चात्मा तथैवासौ व्याप्य सर्वमवस्थितः॥ 62 ॥ 524

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे त्रयोदशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे चतुर्दशोऽध्यायः ॥

श्रीपराशर उवाच

प्रदोषाग्रे कदाचित्तु रासासक्ते जनार्दने।
त्रासयन्समदो गोष्ठमरिष्टस्समुपागमत्॥ 1 ॥ 525

सतोयतोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः।
खुराग्रपातैरत्यर्थं दारयन्धरणीतलम्॥ 2 ॥ 526

लेलिहानस्सनिष्पेषं जिह्वयोष्ठौ पुनः पुनः।
संरम्भाविद्धलाङ्गूलः कठिनस्कन्धबन्धनः॥ 3 ॥ 527

उदग्रककुदाभोगप्रमाणो दुरतिक्रमः।
विण्मूत्रलिप्तपृष्ठाङ्गो गवामुद्वेगकारकः॥ 4 ॥ 528

प्रलम्बकण्ठोऽतिमुखस्तरुखाताङ्कितानः।
पातयन्स गवां गर्भान्दैत्यो वृषभरूपधृक्॥ 5 ॥ 529

सूदयंस्तापसानुग्रो वनानटति यस्सदा॥ 6 ॥ 530

ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः।
गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः॥ 7 ॥ 531

सिंहनादं ततश्चक्रे तलशब्दं च केशवः।
तच्छब्दश्रवणाच्चासौ दामोदरमुपाययौ॥ 8 ॥ 532

अग्रन्यस्तविषाणाग्रः कृष्णकुक्षिकृतेक्षणः।
अभ्यधावत दुष्टात्मा कृष्णं वृषभदानवः॥ 9॥ 533

आयान्तं दैत्यवृषभं दृष्ट्वा कृष्णो महाबलः।
न चचाल तदा स्थानादवज्ञास्मितलीलया॥ 10॥ 534

आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः।
जघान जानुना कुक्षौ विषाणग्रहणाचलम्॥ 11॥ 535

तस्य दर्पबलं भङ्क्त्वा गृहीतस्य विषाणयोः।
अपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरम्॥ 12॥ 536

उत्पाट्य शृङ्गमेकं तु तेनैवाताडयत्ततः।
ममार स महादैत्यो मुखाच्छोणितमुद्वमन्॥ 13॥ 537

तुष्टुवुर्निहते तस्मिन्दैत्ये गोपा जनार्दनम्।
जभ्मे हते सहस्राक्षं पुरा देवगणा यथा॥ 14॥ 538

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे चतुर्दशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे पञ्चदशोऽध्यायः ॥

श्रीपराशर उवाच

ककुद्मति हतेऽरिष्टे धेनुके विनिपातिते।
प्रलम्बे निधनं नीते धृते गोवर्धनाचले ॥ 1 ॥ 539

दमिते कालिये नागे भग्ने तुङ्गद्रुमद्वये।
हतायां पूतनायां च शकटे परिवर्तिते ॥ 2 ॥ 540

कंसाय नारदः प्राह यथावृत्तमनुक्रमात्।
यशोदादेवकीगर्भपरिवृत्त्याद्यशेषतः ॥ 3 ॥ 541

श्रुत्वा तत्सकलं कंसो नारदाद्देवदर्शनात्।
वसुदेवं प्रति तदा कोपं चक्रे सुदुर्मतिः ॥ 4 ॥ 542

सोऽतिकोपादुपालभ्य सर्वयादवसंसदि।
जगर्ह यादवांश्चैव कार्यं चैतदचिन्तयत् ॥ 5 ॥ 543

यावन्न बलमारूढौ रामकृष्णौ सुबालकौ।
तावदेव मया वध्यावसाध्यौ रूढयौवनौ ॥ 6 ॥ 544

चाणूरोऽत्र महावीर्यो मुष्टिकश्च महाबलः।
एताभ्यां मल्लयुद्धेन मारयिष्यामि दुर्मती ॥ 7 ॥ 545

धनुर्महमहायोगव्याजेनानीय तौ व्रजात्।
तथा तथा यतिष्यामि यास्येते सङ्क्षयं यथा ॥ 8 ॥ 546

श्वफल्कतनयं शूरमक्रूरं यदुपुङ्गवम्।
तयोरानयनार्थाय प्रेषयिष्यामि गोकुलम्॥ 9॥ 547

वृन्दावनचरं घोरमादेक्ष्यामि च केशिनम्।
तत्रैवासावतिबलस्तावुभौ घातयिष्यति॥ 10॥ 548

गजः कुवलयापीडो मत्सकाशमिहागतौ।
घातयिष्यति वा गोपौ वसुदेवसुतावुभौ॥ 11॥ 549

श्रीपराशर उवाच

इत्यालोच्य स दुष्टात्मा कंसो रामजनार्दनौ।
हन्तुं कृतमतिर्वीरावक्रूरं वाक्यमब्रवीत्॥ 12॥ 550

कंस उवाच

भो भो दानपते वाक्यं क्रियतां प्रीतये मम।
इतः स्यन्दनमारुह्य गम्यतां नन्दगोकुलम्॥ 13॥ 551

वसुदेवसुतौ तत्र विष्णोरंशसमुद्भवौ।
नाशाय किल सम्भूतौ मम दुष्टौ प्रवर्द्धतः॥ 14॥ 552

धनुर्महो ममाप्यत्र चतुर्दश्यां भविष्यति।
आनेयौ भवता गत्वा मल्लयुद्धाय तत्र तौ॥ 15॥ 553

चाणूरमुष्टिकौ मल्लौ नियुद्धकुशलौ मम।
ताभ्यां सहानयोर्युद्धं सर्वलोकोऽत्र पश्यतु॥ 16॥ 554

गजः कुवलयापीडो महामात्रप्रचोदितः।
स वा हनिष्यते पापौ वसुदेवात्मजौ शिशू॥ 17॥ 555

तौ हत्वा वसुदेवं च नन्दगोपं च दुर्मतिम्।
हनिष्ये पितरं चैनमुग्रसेनं सुदुर्मतिम्॥ 18॥ 556

ततस्समस्तगोपानां गोधनान्यखिलान्यहम्।
वित्तं चापहरिष्यामि दुष्टानां मद्बधैषिणाम्॥ 19॥ 557

त्वामृते यादवाश्चैते द्विषो दानपते मम।
एतेषां च वधायाहं यतिष्येऽनुक्रमात्ततः॥ 20॥ 558

तदा निष्कण्टकं सर्वं राज्यमेतदयादवम्।
प्रसाधिष्ये त्वया तस्मान्मत्प्रीत्यै वीर गम्यताम्॥ 21॥ 559

यथा च माहिषं सर्पिर्दधि चाप्युपहार्य वै।
गोपास्समानयन्त्वाशु तथा वाच्यास्त्वया च ते॥ 22॥ 560

श्रीपराशर उवाच

इत्याज्ञप्तस्तदाक्रूरो महाभागवतो द्विज।
प्रीतिमानभवत्कृष्णं श्वो द्रक्ष्यामीति सत्वरः॥ 23॥ 561

तथेत्युक्त्वा च राजानं रथमारुह्य शोभनम्।
निश्चक्राम ततः पुर्या मथुराया मधुप्रियः॥ 24॥ 562

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे पञ्चदशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे षोडशोऽध्यायः ॥

श्रीपराशर उवाच

केशी चापि बलोदग्रः कंसदूतप्रचोदितः।
कृष्णस्य निधनाकाङ्क्षी वृन्दावनमुपागमत् ॥ 1 ॥ 563

स खुरक्षतभूपृष्ठस्सटाक्षेपधुताम्बुदः।
द्रुतविक्रान्तचन्द्रार्कमार्गो गोपानुपाद्रवत् ॥ 2 ॥ 564

तस्य हेषितशब्देन गोपाला दैत्यवाजिनः।
गोप्यश्च भयसंविग्ना गोविन्दं शरणं ययुः ॥ 3 ॥ 565

त्राहि त्राहीति गोविन्दः श्रुत्वा तेषां ततो वचः।
सतोयजलदध्वानगम्भीरमिदमुक्तवान् ॥ 4 ॥ 566

अलं त्रासेन गोपालाः केशिनः किं भयातुरैः।
भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते ॥ 5 ॥ 567

किमनेनाल्पसारेण हेषिताटोपकारिणा।
दैतेयबलवाह्येन वल्गता दुष्टवाजिना ॥ 6 ॥ 568

एह्येहि दुष्ट कृष्णोऽहं पूष्णस्त्विव पिनाकधृक्।
पातयिष्यामि दशनान्वदनादखिलांस्तव ॥ 7 ॥ 569

इत्युक्त्वास्फोट्य गोविन्दः केशिनस्सम्मुखं ययौ।
विवृतास्यश्च सोऽप्येनं दैतेयाश्च उपाद्रवत् ॥ 8 ॥ 570

बाहुमाभोगिनं कृत्वा मुखे तस्य जनार्दनः।
प्रवेशयामास तदा केशिनो दुष्टवाजिनः॥ 9॥ 571

केशिनो वदने तेन विशता कृष्णबाहुना।
शातिता दशनाः पेतुः सिताभ्रावयवा इव॥ 10॥ 572

कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज।
विनाशाय यथा व्याधिरासम्भूतेरुपेक्षितः॥ 11॥ 573

विपाटितोष्ठो बहुलं सफेनं रुधिरं वमन्।
सोऽक्षिणी विवृते चक्रे विशिष्टे मुक्तबन्धने॥ 12॥ 574

जघान धरणीं पादैश्शकृन्मूत्रं समुत्सृजन्।
स्वेदार्द्रगात्रश्शान्तश्च निर्यत्नस्सोऽभवत्तदा॥ 13॥ 575

व्यादितास्यमहारन्ध्रस्सोऽसुरः कृष्णबाहुना।
निपातितो द्विधा भूमौ वैद्युतेन यथा द्रुमः॥ 14॥ 576

द्विपादे पृष्ठपुच्छार्द्धे श्रवणैकाक्षिनासिके।
केशिनस्ते द्विधाभूते शकले द्वे विरेजतुः॥ 15॥ 577

हत्वा तु केशिनं कृष्णो गोपालैर्मुदितैर्वृतः।
अनायस्ततनुस्स्वस्थो हसंस्तत्रैव तस्थिवान्॥ 16॥ 578

ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः।
तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरमम्॥ 17॥ 579

अथाहान्तर्हितो विप्र नारदो जलदे स्थितः।
केशिनं निहतं दृष्ट्वा हर्षनिर्भरमानसः॥ 18॥ 580

साधु साधु जगन्नाथ लीलयैव यदच्युत।
निहतोऽयं त्वया केशी क्लेशदस्त्रिदिवौकसाम्॥ 19॥ 581

युद्धोत्सुकोऽहमत्यर्थं नरवाजिमहाहवम्।
अभूतपूर्वमन्यत्र द्रष्टुं स्वर्गादिहागतः॥ 20॥ 582

कर्माण्यत्रावतारे ते कृतानि मधुसूदन।
यानि तैर्विस्मितं चेतस्तोषमेतेन मे गतम्॥ 21॥ 583

तुरङ्गस्यास्य शक्रोऽपि कृष्ण देवाश्च बिभ्यति।
धुतकेसरजालस्य हेषतोऽभ्रावलोकिनः॥ 22॥ 584

यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन।
तस्मात्केशवनाम्ना त्वं लोके ख्यातो भविष्यसि॥ 23॥ 585

स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेऽधुना पुनः।
परश्वोऽहं समेष्यामि त्वया केशिनिषूदन॥ 24॥ 586

उग्रसेनसुते कंसे सानुगे विनिपातिते।
भारावतारकर्ता त्वं पृथिव्याः पृथिवीधर॥ 25॥ 587

तत्रानेकप्रकाराणि युद्धानि पृथिवीक्षिताम्।
द्रष्टव्यानि मयायुष्मत्प्रणीतानि जनार्दन॥ 26॥ 588

सोऽहं यास्यामि गोविन्द देवकार्यं महत्कृतम्।
त्वयैव विदितं सर्वं स्वस्ति तेऽस्तु व्रजाम्यहम्॥ 27॥ 589

नारदे तु गते कृष्णस्सह गोपैस्सभाजितः।
विवेश गोकुलं गोपीनेत्रपानैकभाजनम्॥ 28॥ 590

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे षोडशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे सप्तदशोऽध्यायः ॥

श्रीपराशर उवाच

अक्रूरोऽपि विनिष्क्रम्य स्यन्दनेनाशुगामिना।
कृष्णसंदर्शनाकाङ्क्षी प्रययौ नन्दगोकुलम्॥ 1 ॥ 591

चिन्तयामास चाक्रूरो नास्ति धन्यतरो मया।
योऽहमंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः॥ 2 ॥ 592

अद्य मे सफलं जन्म सुप्रभाताभवन्निशा।
यदुन्निद्राभपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखम्॥ 3 ॥ 593

पापं हरति यत्पुंसां स्मृतं सङ्कल्पनामयम्।
तत्पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम्॥ 4 ॥ 594

विनिर्जग्मुर्यतो वेदा वेदाङ्गान्यखिलानि च।
द्रक्ष्यामि तत्परं धाम धाम्नां भगवतो मुखम्॥ 5 ॥ 595

यज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः।
इज्यते योऽखिलाधारस्तं द्रक्ष्यामि जगत्पतिम्॥ 6 ॥ 596

इष्ट्वा यमिन्द्रो यज्ञानां शतेनामरराजताम्।
अवाप तमनन्तादिमहं द्रक्ष्यामि केशवम्॥ 7 ॥ 597

न ब्रह्मा नेन्द्ररुद्राश्विवस्वादित्यमरुद्गणाः।
यस्य स्वरूपं जानन्ति प्रत्यक्षं याति मे हरिः॥ 8 ॥ 598

सर्वात्मा सर्ववित्सर्वस्सर्वभूतेष्ववस्थितः।
यो ह्यचिन्त्योऽव्ययो व्यापी स वक्ष्यति मया सह॥ 9॥ 599

मत्स्यकूर्मवराहाश्वसिंहरूपादिभिः स्थितिम्।
चकार जगतो योऽजः सोऽद्य मां प्रलपिष्यति॥ 10॥ 600

साम्प्रतं च जगत्स्वामी कार्यमात्महृदि स्थितम्।
कर्तुं मनुष्यतां प्राप्तस्स्वेच्छादेहधृगव्ययः॥ 11॥ 601

योऽनन्तः पृथिवीं धत्ते शेखरस्थितिसंस्थिताम्।
सोऽवतीर्णो जगत्यर्थे मामक्रूरेति वक्ष्यति॥ 12॥ 602

पितृपुत्रसुहृद्भ्रातृमातृबन्धुमयीमिमाम्।
यन्मायां नालमुत्तर्तुं जगत्तस्मै नमो नमः॥ 13॥ 603

तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते।
योगमायाममेयाय तस्मै विद्यात्मने नमः॥ 14॥ 604

यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्वतैः।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम्॥ 15॥ 605

यथा यत्र जगद्धाम्नि धातर्येतत्प्रतिष्ठितम्।
सदसत्तेन सत्येन मय्यसौ यातु सौम्यताम्॥ 16॥ 606

स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्॥ 17॥ 607

श्रीपराशर उवाच

इत्थं सञ्चिन्तयन्विष्णुं भक्तिनम्रात्ममानसः।
अक्रूरो गोकुलं प्राप्तः किञ्चित्सूर्ये विराजति॥ 18॥ 608

स ददर्श तदा कृष्णमादावादोहने गवाम्।
वत्समध्यगतं फुल्लनीलोत्पलदलच्छविम्॥ 19॥ 609

प्रफुल्लपद्मपत्राक्षं श्रीवत्साङ्कितवक्षसम्।
प्रलम्बबाहुमायामतुङ्गोरः स्थलमुन्नसम्॥ 20॥ 610

सविलासस्मिताधारं बिभ्राणं मुखपङ्कजम्।
तुङ्गरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम्॥ 21॥ 611

बिभ्राणं वाससी पीते वन्यपुष्पविभूषितम्।
सेन्दुनीलाचलाभं तं सिताम्भोजावतंसकम्॥ 22॥ 612

हंसकुन्देन्दुधवलं नीलाम्बरधरं द्विज।
तस्यानु बलभद्रं च ददर्श यदुनन्दनम्॥ 23॥ 613

प्रांशुमुत्तङ्गबाह्वंसं विकासिमुखपङ्कजम्।
मेघमालापरिवृतं कैलासाद्रिमिवापरम्॥ 24॥ 614

तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः।
पुलकाञ्चितसर्वाङ्गस्तदाक्रूरोऽभवन्मुने॥ 25॥ 615

तदेतत्परमं धाम तदेतत्परमं पदम्।
भगवद्वासुदेवांशो द्विधा योऽयं व्यवस्थितः॥ 26॥ 616

साफल्यमक्ष्णोर्युगमेतदत्र
दृष्टे जगद्धातरि यातमुच्चैः।
अप्यङ्गमेतद्भगवत्प्रसादा -
त्तदङ्गसङ्गे फलवन्मम स्यात्॥ 27॥ 617

अप्येष पृष्ठे मम हस्तपद्मं
करिष्यति श्रीमदनन्तमूर्तिः।

यस्याङ्गुलिस्पर्शहताखिलाघै -
रवाप्यते सिद्धिरपास्तदोषा ॥ 28 ॥ 618

येनाग्निविद्युद्रविरश्मिमाला -
करालमत्युग्रमपेतचक्रम्।
चक्रं घ्नता दैत्यपतेर्हृतानि
दैत्याङ्गनानां नयनाञ्जनानि ॥ 29 ॥ 619

यत्राम्बु विन्यस्य बलिर्मनोज्ञा -
नवाप भोगान्वसुधातलस्थः।
तथामरत्वं त्रिदशाधिपत्वं
मन्वन्तरं पूर्णमपेतशत्रुम् ॥ 30 ॥ 620

अप्येष मां कंसपरिग्रहेण
दोषास्पदीभूतमदोषदुष्टम्।
कर्तावमानोपहतं धिगस्तु
तज्जन्म यत्साधुबहिष्कृतस्य ॥ 31 ॥ 621

ज्ञानात्मकस्यामलसत्त्वराशे -
रपेतदोषस्य सदा स्फुटस्य।
किं वा जगत्यत्र समस्तपुंसा -
मज्ञातमस्यास्ति हृदि स्थितस्य ॥ 32 ॥ 622

तस्मादहं भक्तिविनम्रचेता
व्रजामि सर्वेश्वरमीश्वराणाम्।
अंशावतारं पुरुषोत्तमस्य
ह्यनादिमध्यान्तमजस्य विष्णोः ॥ 33 ॥ 623

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे सप्तदशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे अष्टादशोऽध्यायः ॥

श्रीपराशर उवाच

चिन्तयन्निति गोविन्दमुपगम्य स यादवः।
अक्रूरोऽस्मीति चरणौ ननाम शिरसा हरेः॥ 1 ॥ 624

सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना।
संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे॥ 2 ॥ 625

कृतसंवन्दनौ तेन यथावद्बलकेशवौ।
ततः प्रविष्टौ संहृष्टौ तमादायात्ममन्दिरम्॥ 3 ॥ 626

सह ताभ्यां तदाक्रूरः कृतसंवन्दनादिकः।
भुक्तभोज्यो यथान्यायमाचचक्षे ततस्तयोः॥ 4 ॥ 627

यथा निर्भत्सितस्तेन कंसेनानकदुन्दुभिः।
यथा च देवकी देवी दानवेन दुरात्मना॥ 5 ॥ 628

उग्रसेने यथा कंसस्स्य दुरात्मा च वर्तते।
यं चैवार्थं समुद्दिश्य कंसेन तु विसर्जितः॥ 6 ॥ 629

तत्सर्वं विस्तराच्छ्रुत्वा भगवान्देवकीसुतः।
उवाचाखिलमप्येतज्ज्ञातं दानपते मया॥ 7 ॥ 630

करिष्ये तन्महाभाग यदत्रौपयिकं मतम्।
विचिन्त्यं नान्यथैतत्ते विद्धि कंसं हतं मया॥ 8 ॥ 631

अहंरामश्च मथुरां श्वो यास्यावस्सह त्वया।
गोपवृद्धाश्च यास्यन्ति ह्यादायोपायनं बहु॥ 9॥ 632

निशेयं नीयतां वीर न चिन्तां कर्त्तुमर्हसि।
त्रिरात्राभ्यन्तरे कंसं निहनिष्यामि सानुगम्॥ 10॥ 633

श्रीपराशर उवाच

समादिश्य ततो गोपानक्रूरोऽपि च केशवः।
सुष्वाप बलभद्रश्च नन्दगोपगृहे ततः॥ 11॥ 634

ततः प्रभाते विमले कृष्णरामौ महाद्युती।
अक्रूरेण समं गन्तुमुद्यतौ मथुरां पुरीम्॥ 12॥ 635

दृष्ट्वा गोपीजनस्सास्रः श्लथद्वलयबाहुकः।
निःशश्वासातिदुःखार्त्तः प्राह चेदं परस्परम्॥ 13॥ 636

मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति।
नगरस्त्रीकलालापमधु श्रोत्रेण पास्यति॥ 14॥ 637

विलासवाक्यपानेषु नागरीणां कृतास्पदम्।
चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति॥ 15॥ 638

सारं समस्तगोष्ठस्य विधिना हरता हरिम्।
प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना॥ 16॥ 639

भावगर्भस्मितं वाक्यं विलासललिता गतिः।
नागरीणामतीवैतत्कटाक्षेक्षितमेव च॥ 17॥ 640

ग्राम्यो हरिरयं तासां विलासनिगडैर्युतः।
भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति॥ 18॥ 641

एषैष रथमारुह्य मथुरां याति केशवः।
क्रूरेणाक्रूरकेणात्र निर्घृणेन प्रतारितः॥ 19॥ 642

किं न वेत्ति नृशंसोऽयमनुरागपरं जनम्।
येनैवमक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम्॥ 20॥ 643

एष रामेण सहितः प्रयात्यत्यन्तनिर्घृणः।
रथमारुह्य गोविन्दस्त्वर्यतामस्य वारणे॥ 21॥ 644

गुरूणामग्रतो वक्तुं किं ब्रवीषि न नः क्षमम्।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना॥ 22॥ 645

नन्दगोपमुखा गोपा गन्तुमेते समुद्यताः।
नोद्यमं कुरुते कश्चिद्गोविन्दविनिवर्तने॥ 23॥ 646

सुप्रभाताद्य रजनी मथुरावासियोषिताम्।
पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्रालिपङ्क्तयः॥ 24॥ 647

धन्यास्ते पथि ये कृष्णमितो यान्त्यनिवारिताः।
उद्बहिष्यन्ति पश्यन्तस्स्वदेहं पुलकाञ्चितम्॥ 25॥ 648

मथुरानगरीपौरनयनानां महोत्सवः।
गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति॥ 26॥ 649

को नु स्वप्नस्सभाग्याभिर्दृष्टस्ताभिरधोक्षजम्।
विस्तारिकान्तिनयना या द्रक्ष्यन्त्यनिवारिताः॥ 27॥ 650

अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम्।
उत्कृत्तान्यद्य नेत्राणि विधिनाकरुणात्मना॥ 28॥ 651

अनुरागेण शैथिल्यमस्मासु व्रजिते हरौ।
शैथिल्यमुपयान्त्याशु करेषु वलयान्यपि॥ 29॥ 652

अक्रूरः क्रूरहृदयश्शीघ्रं प्रेरयते हयान्।
एवमार्त्तासु योषित्सु कृपा कस्य न जायते॥ 30॥ 653

एष कृष्णरथस्योच्चैश्चक्ररेणुर्निरीक्ष्यताम्।
दूरीभूतो हरिर्येन सोऽपि रेणुर्न लक्ष्यते॥ 31॥ 654

श्रीपराशर उवाच

इत्येवमतिहार्द्देन गोपीजननिरीक्षितः।
तत्याज व्रजभूभागं सह रामेण केशवः॥ 32॥ 655

गच्छन्तो जवनाश्वेन रथेन यमुनातटम्।
प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दनाः॥ 33॥ 656

अथाह कृष्णमक्रूरो भवद्भ्यां तावदास्यताम्।
यावत्करोमि कालिन्द्यां आह्निकार्हणमम्भसि॥ 34॥ 657

श्रीपराशर उवाच

तथेत्युक्तस्ततस्स्नातस्स्वाचान्तस्स महामतिः।
दध्यौ ब्रह्म परं विप्र प्रविष्टो यमुनाजले॥ 35॥ 658

फणासहस्रमालाढ्यं बलभद्रं ददर्श सः।
कुन्दमालाङ्गमुन्निद्रपद्मपत्रायतेक्षणम्॥ 36॥ 659

वृतं वासुकिरभ्राद्यैर्महद्भिः पवनाशिभिः।
संस्तूयमानमुद्गन्धिवनमालाविभूषितम्॥ 37॥ 660

दधानमसिते वस्त्रे चारुरूपावतंसकम्।
चारुकुण्डलिनं भान्तमन्तर्जलतले स्थितम्॥ 38॥ 661

तस्योत्संगे घनश्याममाताम्रायतलोचनम्।
चतुर्बाहुमुदाराङ्गं चक्राद्यायुधभूषणम्॥ 39॥ 662

पीते वसानं वसने चित्रमाल्योपशोभितम्।
शक्रचापतडिन्मालाविचित्रमिव तोयदम्॥ **40**॥ 663

श्रीवत्सवक्षसं चारु स्फुरन्मकरकुण्डलम्।
ददर्श कृष्णमक्लिष्टं पुण्डरीकावतंसकम्॥ **41**॥ 664

सनन्दनाद्यैर्मुनिभिस्सिद्धयोगैरकल्मषैः।
सञ्चिन्त्यमानं तत्रस्थैर्नासाग्रन्यस्तलोचनैः॥ **42**॥ 665

बलकृष्णौ तथाक्रूरः प्रत्यभिज्ञाय विस्मितः।
अचिन्तयद्रथाच्छीघ्रं कथमत्रागताविति॥ **43**॥ 666

विवक्षोः स्तम्भयामास वाचं तस्य जनार्दनः।
ततो निष्क्रम्य सलिलाद्रथमभ्यागतः पुनः॥ **44**॥ 667

ददर्श तत्र चैवोभौ रथस्योपरि निष्ठितौ।
रामकृष्णौ यथापूर्वं मनुष्यवपुषान्वितौ॥ **45**॥ 668

निमग्नश्च पुनस्तोये ददर्श च तथैव तौ।
संस्तूयमानौ गन्धर्वैर्मुनिसिद्धमहोरगैः॥ **46**॥ 669

ततो विज्ञातसद्भावस्स तु दानपतिस्तदा।
तुष्टाव सर्वविज्ञानमयमच्युतमीश्वरम्॥ **47**॥ 670

अक्रूर उवाच

सन्मात्ररूपिणेऽचिन्त्यमहिम्ने परमात्मने।
व्यापिने नैकरूपैकस्वरूपाय नमो नमः॥ **48**॥ 671

सर्वरूपाय तेऽचिन्त्य हविर्भूताय ते नमः।
नमो विज्ञानपाराय पराय प्रकृतेः प्रभो॥ **49**॥ 672

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः॥ **50**॥ 673

प्रसीद सर्व सर्वात्मन् क्षराक्षरमयेश्वर।
ब्रह्मविष्णुशिवाख्याभिः कल्पनाभिरुदीरितः॥ **51**॥ 674

अनाख्येयस्वरूपात्मन्ननाख्येयप्रयोजन।
अनाख्येयाभिधानं त्वां नतोऽस्मि परमेश्वर॥ **52**॥ 675

न यत्र नाथ विद्यन्ते नामजात्यादिकल्पनाः।
तद्ब्रह्म परमं नित्यमविकारि भवानजः॥ **53**॥ 676

न कल्पनामृतेऽर्थस्य सर्वस्याधिगमो यतः।
ततः कृष्णाच्युतानन्तविष्णुसंज्ञाभिरीड्यते॥ **54**॥ 677

सर्वार्थास्त्वमज विकल्पनाभिरेतै -
र्देवाद्यैर्भवति हि यैरनन्त विश्वम्।
विश्वात्मा त्वमिति विकारहीनमेत -
त्सर्वस्मिन्न हि भवतोऽस्ति किञ्चिदन्यत्॥ **55**॥ 678

त्वं ब्रह्मा पशुपतिरर्यमा विधाता
धाता त्वं त्रिदशपतिस्समीरणोऽग्निः।
तोयेशो धनपतिरन्तकस्त्वमेको
भिन्नार्थैर्जगदभिपासि शक्तिभेदैः॥ **56**॥ 679

विश्वं भवान्सृजति सूर्यगभस्तिरूपो
विश्वेश ते गुणमयोऽयमतः प्रपञ्चः।
रूपं परं सदिति वाचकमक्षरं य -
ज्ज्ञानात्मने सदसते प्रणतोऽस्मि तस्मै॥ **57**॥ 680

ओं नमो वासुदेवाय नमस्संकर्षणाय च।
प्रद्युम्नाय नमस्तुभ्यमनिरुद्धाय ते नमः॥ 58॥ 681

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे अष्टादशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे एकोनविंशोऽध्यायः ॥

श्रीपराशर उवाच

एवमन्तर्जले विष्णुमभिष्टूय स यादवः।
अर्चयामास सर्वेशं धूपपुष्पैर्मनोमयैः॥ 1 ॥ 682

परित्यक्तान्यविषयो मनस्तत्र निवेश्य सः।
ब्रह्मभूते चिरं स्थित्वा विरराम समाधितः॥ 2 ॥ 683

कृतकृत्यमिवात्मानं मन्यमानो महामतिः।
आजगाम रथं भूयो निर्गम्य यमुनाम्भसः॥ 3 ॥ 684

ददर्श रामकृष्णौ च यथापूर्वमवस्थितौ।
विस्मिताक्षस्तदाक्रूरस्तं च कृष्णोऽभ्यभाषत॥ 4 ॥ 685

श्रीकृष्ण उवाच

नूनं ते दृष्टमाश्चर्यमक्रूर यमुनाजले।
विस्मयोत्फुल्लनयनो भवान्संलक्ष्यते यतः॥ 5 ॥ 686

अक्रूर उवाच

अन्तर्जले यदाश्चर्यं दृष्टं तत्र मयाच्युत।
तदत्रापि हि पश्यामि मूर्तिमत्पुरतः स्थितम्॥ 6 ॥ 687

जगदेतन्महाश्चर्यरूपं यस्य महात्मनः।
तेनाश्चर्यपरेणाहं भवता कृष्ण सङ्गतः॥ 7 ॥ 688

तत्किमेतेन मथुरां यास्यामो मधुसूदन।
बिभेमि कंसाद्भिग्जन्म परपिण्डोपजीविनाम्॥ 8॥ 689

इत्युक्त्वा चोदयामास स हयान् वातरंहसः।
सम्प्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरां पुरीम्॥ 9॥ 690

विलोक्य मथुरां कृष्णं रामं चाह स यादवः।
पद्भ्यां यातं महावीरौ रथेनैको विशाम्यहम्॥ 10॥ 691

गन्तव्यं वसुदेवस्य नो भवद्भ्यां तथा गृहम्।
युवयोर्हि कृते वृद्धस्स कंसेन निरस्यते॥ 11॥ 692

श्रीपराशर उवाच

इत्युक्त्वा प्रविवेशाथ सोऽक्रूरो मथुरां पुरीम्।
प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ॥ 12॥ 693

स्त्रीभिर्नरैश्च सानन्दं लोचनैरभिवीक्षितौ।
जग्मतुर्लीलया वीरौ मत्तौ बालगजाविव॥ 13॥ 694

भ्रममाणौ ततो दृष्ट्वा रजकं रंगकारकम्।
अयाचेतां सुरूपाणि वासांसि रुचिराणि तौ॥ 14॥ 695

कंसस्य रजकः सोऽथ प्रसादारूढविस्मयः।
बहून्याक्षेपवाक्यानि प्राहोच्चै रामकेशवौ॥ 15॥ 696

ततस्तलप्रहारेण कृष्णस्तस्य दुरात्मनः।
पातयामास रोषेण रजकस्य शिरो भुवि॥ 16॥ 697

हत्वादाय च वस्त्राणि पीतनीलाम्बरौ ततः।
कृष्णरामौ मुदा युक्तौ मालाकारगृहं गतौ॥ 17॥ 698

विकासिनेत्रयुगलो मालाकारोऽतिविस्मितः।
एतौ कस्य सुतौ यातौ मैत्रेयाचिन्तयत्तदा॥ **18**॥ 699

पीतनीलाम्बरधरौ तौ दृष्ट्वातिमनोहरौ।
स तर्कयामास तदा भुवं देवावुपागतौ॥ **19**॥ 700

विकासिमुखपद्माभ्यां ताभ्यां पुष्पाणि याचितः।
भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम्॥ **20**॥ 701

प्रसादपरमौ नाथौ मम गेहमुपागतौ।
धन्योऽहमर्चयिष्यामीत्याह तौ माल्यजीवनः॥ **21**॥ 702

ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः।
चारूण्येतान्यथैतानि प्रददौ स प्रलोभयन्॥ **22**॥ 703

पुनः पुनः प्रणम्योभौ मालाकारो नरोत्तमौ।
ददौ पुष्पाणि चारूणि गन्धवन्त्यमलानि च॥ **23**॥ 704

मालाकाराय कृष्णोऽपि प्रसन्नः प्रददौ वरान्।
श्रीस्त्वां मत्संश्रया भद्र न कदाचित्त्यजिष्यति॥ **24**॥ 705

बलहानिर्न ते सौम्य धनहानिरथापि वा।
यावद्दिनानि तावच्च न नशिष्यति सन्ततिः॥ **25**॥ 706

भुक्त्वा च विपुलान्भोगांस्त्वमन्ते मत्प्रसादतः।
ममानुस्मरणं प्राप्य दिव्यं लोकमवाप्स्यसि॥ **26**॥ 707

धर्मे मनश्च ते भद्र सर्वकालं भविष्यति।
युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यति॥ **27**॥ 708

नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवः।
अवाप्स्यति महाभाग यावत्सूर्यो भविष्यति॥ **28**॥ 709

श्रीपराशर उवाच

इत्युक्त्वा तद्गृहात्कृष्णो बलदेवसहायवान्।
निर्जगाम मुनिश्रेष्ठ मालाकारेण पूजितः॥ 29॥ 710

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे एकोनविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे विंशोऽध्यायः ॥

श्रीपराशर उवाच

राजमार्गे ततः कृष्णस्सानुलेपनभाजनाम्।
ददर्श कुब्जामायान्तीं नवयौवनगोचराम्॥ 1॥ 711

तामाह ललितं कृष्णः कस्येदमनुलेपनम्।
भवत्या नीयते सत्यं वदेन्दीवरलोचने॥ 2॥ 712

सकामेनेव सा प्रोक्ता सानुरागा हरिं प्रति।
प्राह सा ललितं कुब्जा तद्दर्शनबलात्कृता॥ 3॥ 713

कान्त कस्मान्न जानासि कंसेन विनियोजिताम्।
नैकवक्रेति विख्यातामनुलेपनकर्मणि॥ 4॥ 714

नान्यपिष्टं हि कंसस्य प्रीतये ह्यनुलेपनम्।
भवाम्यहमतीवास्य प्रसादधनभाजनम्॥ 5॥ 715

श्रीकृष्ण उवाच

सुगन्धमेतद्राजार्हं रुचिरं रुचिरानने।
आवयोर्गात्रसदृशं दीयतामनुलेपनम्॥ 6॥ 716

श्रीपराशर उवाच

श्रुत्वैतदाह सा कुब्जा गृह्यतामिति सादरम्।
अनुलेपनं च प्रददौ गात्रयोग्यमथोभयोः॥ 7॥ 717

भक्तिच्छेदानुलिप्ताङ्गौ ततस्तौ पुरुषर्षभौ।
सेन्द्रचापौ व्यराजेतां सितकृष्णाविवाम्बुदौ॥ 8॥ 718

ततस्तां चिबुके शौरिरुल्लापनविधानवित्।
उत्पाट्य तोलयामास द्व्यङ्गुलेनाग्रपाणिना॥ 9॥ 719

चकर्ष पद्भ्यां च तदा ऋजुत्वं केशवोऽनयत्।
ततस्सा ऋजुतां प्राप्ता योषितामभवद्वरा॥ 10॥ 720

विलासललितं प्राह प्रेमगर्भभरालसम्।
वस्त्रे प्रगृह्य गोविन्दं मम गेहं व्रजेति वै॥ 11॥ 721

एवमुक्तस्तया शौरी रामस्यालोक्य चाननम्।
प्रहस्य कुब्जां तामाह नैकवक्रामनिन्दिताम्॥ 12॥ 722

आयास्ये भवतीगेहमिति तां प्रहसन्हरिः।
विससर्ज जहासोच्चै रामस्यालोक्य चाननम्॥ 13॥ 723

भक्तिभेदानुलिप्ताङ्गौ नीलपीताम्बरौ तु तौ।
धनुश्शालां ततो यातौ चित्रमाल्योपशोभितौ॥ 14॥ 724

आयागं तद्धनूरत्नं ताभ्यां पृष्टैस्तु रक्षिभिः।
आख्याते सहसा कृष्णो गृहीत्वापूरयद्धनुः॥ 15॥ 725

ततः पूरयता तेन भज्यमानं बलाद्धनुः।
चकार सुमहच्छब्दं मथुरा येन पूरिता॥ 16॥ 726

अनुयुक्तौ ततस्तौ तु भग्ने धनुषि रक्षिभिः।
रक्षिसैन्यं निहत्योभौ निष्क्रान्तौ कार्मुकालयात्॥ 17॥ 727

अक्रूरागमवृत्तान्तमुपलभ्य महद्धनुः।
भग्नं श्रुत्वा च कंसोऽपि प्राह चाणूरमुष्टिकौ॥ 18॥ 728

कंस उवाच

गोपालदारकौ प्राप्तौ भवद्भ्यां तु ममाग्रतः।
मल्लयुद्धेन हन्तव्यौ मम प्राणहरौ हि तौ॥ 19॥ 729

नियुद्धे तद्विनाशेन भवद्भ्यां तोषितो ह्यहम्।
दास्याम्यभिमतान्कामान्नान्यथैतौ महाबलौ॥ 20॥ 730

न्यायतोऽन्यायतो वापि भवद्भ्यां तौ ममाहितौ।
हन्तव्यौ तद्वधाद्राज्यं सामान्यं वां भविष्यति॥ 21॥ 731

इत्यादिश्य स तौ मल्लौ ततश्चाहूय हस्तिपम्।
प्रोवाचोच्चैस्त्वया मल्लसमाजद्वारि कुञ्जरः॥ 22॥ 732

स्थाप्यः कुवलयापीडस्तेन तौ गोपदारकौ।
घातनीयौ नियुद्धाय रङ्गद्वारमुपागतौ॥ 23॥ 733

तमप्याज्ञाप्य दृष्ट्वा च सर्वान्मञ्चानुपाकृतान्।
आसन्नमरणः कंसः सूर्योदयमुदैक्षत॥ 24॥ 734

ततः समस्तमञ्चेषु नागरस्स तदा जनः।
राजमञ्चेषु चारूढास्सह भृत्यैर्नराधिपाः॥ 25॥ 735

मल्लप्राश्निकवर्गश्च रङ्गमध्यसमीपगः।
कृतः कंसेन कंसोऽपि तुङ्गमञ्चे व्यवस्थितः॥ 26॥ 736

अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः।
अन्ये च वारमुख्यानामन्ये नागरयोषिताम्॥ 27॥ 737

नन्दगोपादयो गोपा मञ्चेष्वन्येष्ववस्थिताः।
अक्रूरवसुदेवौ च मञ्चप्रान्ते व्यवस्थितौ॥ 28॥ 738

नागरीयोषितां मध्ये देवकीपुत्रगर्द्धिनी।
अन्तकालेऽपि पुत्रस्य द्रक्ष्यामीति मुखं स्थिता॥ 29॥ 739

वाद्यमानेषु तूर्येषु चाणूरे चापि वल्गति।
हाहाकारपरे लोके ह्यास्फोटयति मुष्टिके॥ 30॥ 740

ईषद्धसन्तौ तौ वीरौ बलभद्रजनार्दनौ।
गोपवेषधरौ बालौ रङ्गद्वारमुपागतौ॥ 31॥ 741

ततः कुवलयापीडो महामात्रप्रचोदितः।
अभ्यधावत वेगेन हन्तुं गोपकुमारकौ॥ 32॥ 742

हाहाकारो महाञ्जज्ञे रङ्गमध्ये द्विजोत्तम।
बलदेवोऽनुजं दृष्ट्वा वचनं चेदमब्रवीत्॥ 33॥ 743

हन्तव्यो हि महाभाग नागोऽयं शत्रुचोदितः॥ 34॥ 744

इत्युक्तस्सोऽग्रजेनाथ बलदेवेन वै द्विज।
सिंहनादं ततश्चक्रे माधवः परवीरहा॥ 35॥ 745

करेण करमाकृष्य तस्य केशिनिषूदनः।
भ्रामयामास तं शौरिरैरावतसमं बले॥ 36॥ 746

ईशोऽपि सर्वजगतां बाललीलानुसारतः।
क्रीडित्वा सुचिरं कृष्णः करिदन्तपदान्तरे॥ 37॥ 747

उत्पाट्य वामदन्तं तु दक्षिणेनैव पाणिना।
ताडयामास यन्तारं तस्यासीच्छतधा शिरः॥ 38॥ 748

दक्षिणं दन्तमुत्पाट्य बलभद्रोऽपि तत्क्षणात्।
सरोषस्तेन पार्श्वस्थान् गजपालानपोथयत्॥ 39॥ 749

ततस्तूत्प्लुत्य वेगेन रौहिणेयो महाबलः।
जघान वामपादेन मस्तके हस्तिनं रुषा॥ 40॥ 750

स पपात हतस्तेन बलभद्रेण लीलया।
सहस्राक्षेण वज्रेण ताडितः पर्वतो यथा॥ 41॥ 751

हत्वा कुवलयापीडं हस्त्यारोहप्रचोदितम्।
मदासृगनुलिप्ताङ्गौ हस्तिदन्तवरायुधौ॥ 42॥ 752

मृगमध्ये यथा सिंहौ गर्वलीलावलोकिनौ।
प्रविष्टौ सुमहारङ्गं बलभद्रजनार्दनौ॥ 43॥ 753

हाहाकारो महाञ्जज्ञे महारङ्गे त्वनन्तरम्।
कृष्णोऽयं बलभद्रोऽयमिति लोकस्य विस्मयः॥ 44॥ 754

सोऽयं येन हता घोरा पूतना बालघातिनी।
क्षिप्तं तु शकटं येन भग्नौ तु यमलार्जुनौ॥ 45॥ 755

सोऽयं यः कालियं नागं ममर्दारुह्य बालकः।
धृतो गोवर्द्धनो येन सप्तरात्रं महागिरिः॥ 46॥ 756

अरिष्टो धेनुकः केशी लीलयैव महात्मना।
निहता येन दुर्वृत्ता दृश्यतामेष सोऽच्युतः॥ 47॥ 757

अयं चास्य महाबाहुर्बलभद्रोऽग्रतोऽग्रजः।
प्रयाति लीलया योषिन्मनोनयननन्दनः॥ 48॥ 758

अयं स कथ्यते प्राज्ञैः पुराणार्थविशारदैः।
गोपालो यादवं वंशं मग्नमभ्युद्धरिष्यति॥ 49॥ 759

अयं हि सर्वलोकस्य विष्णोरखिलजन्मनः।
अवतीर्णो महीमंशो नूनं भारहरो भुवः॥ 50॥ 760

इत्येवं वर्णिते पौरे रामे कृष्णे च तत्क्षणात्।
उरस्तताप देवक्याः स्नेहस्रुतपयोधरम्॥ 51॥ 761

महोत्सवमिवासाद्य पुत्राननविलोकनात्।
युवेव वसुदेवोऽभूद्विहायाभ्यागतां जराम्॥ 52॥ 762

विस्तारिताक्षियुगलो राजान्तःपुरयोषिताम्।
नागरस्त्रीसमूहश्च द्रष्टुं न विरराम तम्॥ 53॥ 763

सख्यः पश्यत कृष्णस्य मुखमत्यरुणेक्षणम्।
गजयुद्धकृतायासस्वेदाम्बुकणिकाचितम्॥ 54॥ 764

विकासिशरदम्भोजमवश्यायजलोक्षितम्।
परिभूय स्थितं जन्म सफलं क्रियतां दृशः॥ 55॥ 765

श्रीवत्साङ्कं महद्धाम बालस्यैतद्विलोक्यताम्।
विपक्षक्षपणं वक्षो भुजयुग्मं च भामिनि॥ 56॥ 766

किं न पश्यसि दुग्धेन्दुमृणालधवलाकृतिम्।
बलभद्रमिमं नीलपरिधानमुपागतम्॥ 57॥ 767

वल्गता मुष्टिकेनैव चाणूरेण तथा सखि।
क्रीडतो बलभद्रस्य हरेर्हास्यं विलोक्यताम्॥ 58॥ 768

सख्यः पश्यत चाणूरं नियुद्धार्थमयं हरिः।
समुपैति न सन्त्यत्र किं वृद्धा मुक्तकारिणः॥ 59॥ 769

क्व यौवनोन्मुखीभूतसुकुमारतनुर्हरिः।
क्व वज्रकठिनाभोगशरीरोऽयं महासुरः॥ 60॥ 770

इमौ सुललितैरङ्गैर्वर्तेते नवयौवनौ।
दैतेयमल्लाश्चाणूरप्रमुखास्त्वतिदारुणाः॥ 61॥ 771

नियुद्धप्राश्निकानां तु महानेष व्यतिक्रमः।
यद्बालबलिनोर्युद्धं मध्यस्थैस्समुपेक्ष्यते॥ 62॥ 772

श्रीपराशर उवाच

इत्थं पुरस्त्रीलोकस्य वदतश्चालयन्भुवम्।
ववल्ग बद्धकक्ष्योऽन्तर्जनस्य भगवान्हरिः॥ 63॥ 773

बलभद्रोऽपि चास्फोट्य ववल्ग ललितं तथा।
पदे पदे तथा भूमिर्यन्न शीर्णा तदद्भुतम्॥ 64॥ 774

चाणूरेण ततः कृष्णो युयुधेऽमितविक्रमः।
नियुद्धकुशलो दैत्यो बलभद्रेण मुष्टिकः॥ 65॥ 775

सन्निपातावधूतैस्तु चाणूरेण समं हरिः।
प्रक्षेपणैर्मुष्टिभिश्च कीलवज्रनिपातनैः॥ 66॥ 776

पादोद्धूतैः प्रमृष्टैश्च तयोर्युद्धमभून्महत्॥ 67॥ 777

अशस्त्रमतिघोरं तत्तयोर्युद्धं सुदारुणम्।
बलप्राणविनिष्पाद्यं समाजोत्सवसन्निधौ॥ 68॥ 778

यावद्यावच्च चाणूरो युयुधे हरिणा सह।
प्राणहानिमवापाग्र्यां तावत्तावल्लवाल्लवम्॥ 69॥ 779

कृष्णोऽपि युयुधे तेन लीलयैव जगन्मयः।
खेदाच्चालयता कोपान्निजशेखरकेसरम्॥ 70॥ 780

बलक्षयं विवृद्धिं च दृष्ट्वा चाणूरकृष्णयोः।
वारयामास तूर्याणि कंसः कोपपरायणः॥ 71॥ 781

मृदङ्गादिषु तूर्येषु प्रतिषिद्धेषु तत्क्षणात्।
खे सङ्गतान्यवाद्यन्त देवतूर्याण्यनेकशः॥ 72॥ 782

जय गोविन्द चाणूरं जहि केशव दानवम्।
अन्तर्द्धानगता देवास्तमूचुरतिहर्षिताः॥ 73॥ 783

चाणूरेण चिरं कालं क्रीडित्वा मधुसूदनः।
उत्थाप्य भ्रामयामास तद्वधाय कृतोद्यमः॥ 74॥ 784

भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित्।
भूमावास्फोटयामास गगने गतजीवितम्॥ 75॥ 785

भूमावास्फोटितस्तेन चाणूरः शतधाभवत्।
रक्तस्रावमहापङ्कां चकार च तदा भुवम्॥ 76॥ 786

बलदेवोऽपि तत्कालं मुष्टिकेन महाबलः।
युयुधे दैत्यमल्लेन चाणूरेण यथा हरिः॥ 77॥ 787

सोऽप्येनं मुष्टिना मूर्ध्नि वक्षस्याहत्य जानुना।
पातयित्वा धरापृष्ठे निष्पिपेष गतायुषम्॥ 78॥ 788

कृष्णस्तोशलकं भूयो मल्लराजं महाबलम्।
वाममुष्टिप्रहारेण पातयामास भूतले॥ 79॥ 789

चाणूरे निहते मल्ले मुष्टिके विनिपातिते।
नीते क्षयं तोशलके सर्वे मल्लाः प्रदुद्रुवुः॥ 80॥ 790

ववल्गतुस्ततो रंगे कृष्णसङ्कर्षणावुभौ।
समानवयसो गोपान्बलादाकृष्य हर्षितौ॥ 81॥ 791

कंसोऽपि कोपरक्ताक्षः प्राहोच्चैर्व्यायतान्नरान्।
गोपावेतौ समाजौघान्निष्क्राम्येतां बलादितः॥ 82॥ 792

नन्दोऽपि गृह्यतां पापो निर्गलैरायसैरिह।
अवृद्धार्हेण दण्डेन वसुदेवोऽपि वध्यताम्॥ **83**॥ 793

वल्गन्ति गोपाः कृष्णेन ये चेमे सहिताः पुरः।
गावो निगृह्यतामेषां यच्चास्ति वसु किञ्चन॥ **84**॥ 794

एवमाज्ञापयन्तं तु प्रहस्य मधुसूदनः।
उत्प्लुत्यारुह्य तं मञ्चं कंसं जग्राह वेगतः॥ **85**॥ 795

केशेष्वाकृष्य विगलत्किरीटमवनीतले।
स कंसं पातयामास तस्योपरि पपात च॥ **86**॥ 796

अशेषजगदाधारगुरुणा पततोपरि।
कृष्णेन त्याजितः प्राणानुग्रसेनात्मजो नृपः॥ **87**॥ 797

मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः।
चकर्ष देहं कंसस्य रङ्गमध्ये महाबलः॥ **88**॥ 798

गौरवेणातिमहता परिघा तेन कृष्यता।
कृता कंसस्य देहेन वेगेनेव महाम्भसः॥ **89**॥ 799

कंसे गृहीते कृष्णेन तद्भ्राताऽभ्यागतो रुषा।
सुमाली बलभद्रेण लीलयैव निपातितः॥ **90**॥ 800

ततो हाहाकृतं सर्वमासीत्तद्रङ्गमण्डलम्।
अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम्॥ **91**॥ 801

कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः।
देवक्याश्च महाबाहुर्बलदेवसहायवान्॥ **92**॥ 802

उत्थाप्य वसुदेवस्तं देवकी च जनार्दनम्।
स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ॥ **93**॥ 803

श्रीवसुदेव उवाच

प्रसीद सीदतां दत्तो देवानां यो वरः प्रभो।
तथावयोः प्रसादेन कृतोद्धारस्स केशव॥ **94**॥ 804

आराधितो यद्भगवानवतीर्णो गृहे मम।
दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलम्॥ **95**॥ 805

त्वमन्तः सर्वभूतानां सर्वभूतमयः स्थितः।
प्रवर्तेते समस्तात्मंस्त्वत्तो भूतभविष्यती॥ **96**॥ 806

यज्ञैस्त्वमिज्यसेऽचिन्त्य सर्वदेवमयाच्युत।
त्वमेव यज्ञो यष्टा च यज्वनां परमेश्वर॥ **97**॥ 807

समुद्भवस्समस्तस्य जगतस्त्वं जनार्दन॥ **98**॥ 808

सापह्नवं मम मनो यदेतत्त्वयि जायते।
देवक्याश्चात्मजप्रीत्या तदत्यन्तविडम्बना॥ **99**॥ 809

त्वं कर्ता सर्वभूतानामनादिनिधनो भवान्।
त्वां मनुष्यस्य कस्यैषा जिह्वा पुत्रेति वक्ष्यति॥ **100**॥ 810

जगदेतज्जगन्नाथ सम्भूतमखिलं यतः।
कया युक्त्या विना मायां सोऽस्मत्तः सम्भविष्यति॥ **101**॥ 811

यस्मिन्प्रतिष्ठितं सर्वं जगत्स्थावरजङ्गमम्।
स कोष्ठोत्सङ्गशयनो मानुषो जायते कथम्॥ **102**॥ 812

स त्वं प्रसीद परमेश्वर पाहि विश्व -
मंशावतारकरणैर्न ममासि पुत्रः।
आब्रह्मपादपमिदं जगदेतदीश
त्वत्तो विमोहयसि किं पुरुषोत्तमास्मान्॥ **103**॥ 813

मायाविमोहितदृशा तनयो ममेति
कंसाद्भयं कृतमपास्तभयातितीव्रम्।
नीतोऽसि गोकुलमरातिभयाकुलेन
वृद्धिं गतोऽसि मम नास्ति ममत्वमीश॥ **104**॥ 814

कर्माणि रुद्रमरुदश्विशतक्रतूनां
साध्यानि यस्य न भवन्ति निरीक्षितानि।
त्वं विष्णुरीश जगतामुपकारहेतोः
प्राप्तोऽसि नः परिगतो विगतो हि मोहः॥ **105**॥ 815

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे विंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे एकविंशोऽध्यायः ॥

श्रीपराशर उवाच

तौ समुत्पन्नविज्ञानौ भगवत्कर्मदर्शनात्।
देवकीवसुदेवौ तु दृष्ट्वा मायां पुनर्हरिः।
मोहाय यदुचक्रस्य वितनान स वैष्णवीम्॥ **1** ॥ 816

उवाच चाम्ब हे तात चिरादुत्कण्ठितेन मे।
भवन्तौ कंसभीतेन दृष्टौ सङ्कर्षणेन च॥ **2** ॥ 817

कुर्वतां याति यः कालो मातापित्रोरपूजनम्।
तत्खण्डमायुषो व्यर्थमसाधूनां हि जायते॥ **3** ॥ 818

गुरुदेवद्विजातीनां मातापित्रोश्च पूजनम्।
कुर्वतां सफलः कालो देहिनां तात जायते॥ **4** ॥ 819

तत्क्षन्तव्यमिदं सर्वमतिक्रमकृतं पितः।
कंसवीर्यप्रतापाभ्यामावयोः परवश्ययोः॥ **5** ॥ 820

श्रीपराशर उवाच

इत्युक्त्वाथ प्रणम्योभौ यदुवृद्धाननुक्रमात्।
यथावदभिपूज्याथ चक्रतुः पौरमाननम्॥ **6** ॥ 821

कंसपत्न्यस्ततः कंसं परिवार्य हतं भुवि।
विलेपुर्मातरश्चास्य दुःखशोकपरिप्लुताः॥ **7** ॥ 822

बहुप्रकारमत्यर्थं पश्चात्तापातुरो हरिः।
तास्समाश्वासयामास स्वयमस्राविलेक्षणः॥ 8॥ 823

उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः।
अभ्यसिञ्चत्ततदैवैनं निजराज्ये हतात्मजम्॥ 9॥ 824

राज्येऽभिषिक्तः कृष्णेन यदुसिंहस्सुतस्य सः।
चकार प्रेतकार्याणि ये चान्ये तत्र घातिताः॥ 10॥ 825

कृतौद्‌र्ध्वदैहिकं चैनं सिंहासनगतं हरिः।
उवाचाज्ञापय विभो यत्कार्यमविशङ्कितः॥ 11॥ 826

ययातिशापाद्वंशोऽयमराज्यार्होऽपि साम्प्रतम्।
मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः॥ 12॥ 827

श्रीपराशर उवाच

इत्युक्त्वा सोऽस्मरद्वायुमाजगाम च तत्क्षणात्।
उवाच चैनं भगवान्केशवः कार्यमानुषः॥ 13॥ 828

गच्छेदं ब्रूहि वायो त्वमलं गर्वेण वासव।
दीयतामुग्रसेनाय सुधर्मा भवता सभा॥ 14॥ 829

कृष्णो ब्रवीति राजार्हमेतद्रत्नमनुत्तमम्।
सुधर्माख्यसभा युक्तमस्यां यदुभिरासितुम्॥ 15॥ 830

श्रीपराशर उवाच

इत्युक्तः पवनो गत्वा सर्वमाह शचीपतिम्।
ददौ सोऽपि सुधर्माख्यां सभां वायोः पुरन्दरः॥ 16॥ 831

वायुना चाहृतां दिव्यां सभां ते यदुपुङ्गवाः।
बुभुजुस्सर्वरत्नाढ्यां गोविन्दभुजसंश्रयाः॥ 17॥ 832

विदिताखिलविज्ञानौ सर्वज्ञानमयावपि।
शिष्याचार्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ॥ 18॥ 833

ततस्सान्दीपनिं काश्यमवन्तिपुरवासिनम्।
विद्यार्थं जग्मतुर्बालौ कृतोपनयनक्रमौ॥ 19॥ 834

वेदाभ्यासकृतप्रीती सङ्कर्षणजनार्दनौ।
तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ।
दर्शयाञ्चक्रतुर्वीरावाचारमखिले जने॥ 20॥ 835

सरहस्यं धनुर्वेदं ससङ्ग्रहमधीयताम्।
अहोरात्रचतुष्षष्ट्या तदद्भुतमभूद्विज॥ 21॥ 836

सान्दीपनिरसम्भाव्यं तयोः कर्मातिमानुषम्।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ॥ 22॥ 837

साङ्गांश्च चतुरो वेदान्सर्वशास्त्राणि चैव हि।
अस्त्रग्राममशेषं च प्रोक्तमात्रमवाप्य तौ॥ 23॥ 838

ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा॥ 24॥ 839

सोऽप्यतीन्द्रियमालोक्य तयोः कर्म महामतिः।
अयाचत मृतं पुत्रं प्रभासे लवणार्णवे॥ 25॥ 840

गृहीतास्त्रौ ततस्तौ तु सार्घ्यहस्तो महोदधिः।
उवाच न मया पुत्रो हृतस्सान्दीपनेरिति॥ 26॥ 841

दैत्यः पञ्चजनो नाम शङ्खरूपस्स बालकम्।
जग्राह योऽस्ति सलिले ममैवासुरसूदन॥ 27॥ 842

श्रीपराशर उवाच

इत्युक्तो ऽन्तर्जलं गत्वा हत्वा पञ्चजनं च तम्।
कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम्॥ **28**॥ 843

यस्य नादेन दैत्यानां बलहानिरजायत।
देवानां ववृधे तेजो यात्यधर्मश्च सङ्क्षयम्॥ **29**॥ 844

तं पाञ्चजन्यमापूर्य गत्वा यमपुरं हरिः।
बलदेवश्च बलवाञ्जित्वा वैवस्वतं यमम्॥ **30**॥ 845

तं बालं यातनासंस्थं यथापूर्वशरीरिणम्।
पित्रे प्रदत्तवान्कृष्णो बलश्च बलिनां वरः॥ **31**॥ 846

मथुरां च पुनः प्राप्तावुग्रसेनेन पालिताम्।
प्रहृष्टपुरुषस्त्रीकामुभौ रामजनार्दनौ॥ **32**॥ 847

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे एकविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे द्वाविंशोऽध्यायः ॥

श्रीपराशर उवाच

जरासन्धसुते कंस उपयेमे महाबलः।
अस्तिं प्राप्तिं च मैत्रेय तयोर्भर्तृहणं हरिम्॥ 1 ॥ 848

महाबलपरीवारो मगधाधिपतिर्बली।
हन्तुमभ्याययौ कोपाज्जरासन्धस्सयादवम्॥ 2 ॥ 849

उपेत्य मथुरां सोऽथ रुरोध मगधेश्वरः।
अक्षौहिणीभिस्सैन्यस्य त्रयोविंशतिभिर्वृतः॥ 3 ॥ 850

निष्क्रम्याल्पपरीवारावुभौ रामजनार्दनौ।
युयुधाते समं तस्य बलिनौ बलिसैनिकैः॥ 4 ॥ 851

ततो रामश्च कृष्णश्च मतिं चक्रतुरञ्जसा।
आयुधानां पुराणानामादाने मुनिसत्तम॥ 5 ॥ 852

अनन्तरं हरेश्शार्ङ्गं तूणौ चाक्षयसायकौ।
आकाशादागतौ विप्र तथा कौमोदकी गदा॥ 6 ॥ 853

हलं च बलभद्रस्य गगनादागतं महत्।
मनसोऽभिमतं विप्र सुनन्दं मुसलं तथा॥ 7 ॥ 854

ततो युद्धे पराजित्य ससैन्यं मगधाधिपम्।
पुरीं विविशतुर्वीरावुभौ रामजनार्दनौ॥ 8 ॥ 855

जिते तस्मिन्सुदुर्वृत्ते जरासन्धे महामुने।
जीवमाने गते कृष्णस्तेनामन्यत नाजितम्॥ 9॥ 856

पुनरप्याजगामाथ जरासन्धो बलान्वितः।
जितश्च रामकृष्णाभ्यामपक्रान्तो द्विजोत्तम॥ 10॥ 857

दश चाष्टौ च सङ्ग्रामानेवमत्यन्तदुर्मदः।
यदुभिर्मागधो राजा चक्रे कृष्णपुरोगमैः॥ 11॥ 858

सर्वेष्वेतेषु युद्धेषु यादवैस्स पराजितः।
अपक्रान्तो जरासन्धस्स्वल्पसैन्यैर्बलाधिकः॥ 12॥ 859

न तद्बलं यादवानां विजितं यदनेकशः।
तत्तु सन्निधिमाहात्म्यं विष्णोरंशस्य चक्रिणः॥ 13॥ 860

मनुष्यधर्मशीलस्य लीला सा जगतीपतेः।
अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति॥ 14॥ 861

मनसैव जगत्सृष्टिं संहारं च करोति यः।
तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः॥ 15॥ 862

तथापि यो मनुष्याणां धर्मस्तमनुवर्तते।
कुर्वन्बलवता सन्धिं हीनैर्युद्धं करोत्यसौ॥ 16॥ 863

साम चोपप्रदानं च तथा भेदं च दर्शयन्।
करोति दण्डपातं च क्वचिदेव पलायनम्॥ 17॥ 864

मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते।
लीला जगत्पतेस्तस्यच्छन्दतः परिवर्तते॥ 18॥ 865

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे द्वाविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे त्रयोविंशोऽध्यायः ॥

श्रीपराशर उवाच

गार्ग्य गोष्ठ्यां द्विजं श्यालष्षण्ढ इत्युक्तवान्द्विज।
यदूनां सन्निधौ सर्वे जहसुर्यादवास्तदा ॥ 1 ॥ 866

ततः कोपपरीतात्मा दक्षिणापथमेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥ 2 ॥ 867

आराधयन्महादेवं लोहचूर्णमभक्षयत्।
ददौ वरं च तुष्टोऽस्मै वर्षे तु द्वादशे हरः ॥ 3 ॥ 868

सन्तोषयामास च तं यवनेशो ह्यनात्मजः।
तद्योषित्सङ्गमाच्चास्य पुत्रोऽभूदलिसन्निभः ॥ 4 ॥ 869

तं कालयवनं नाम राज्ये स्वे यवनेश्वरः।
अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् ॥ 5 ॥ 870

स तु वीर्यमदोन्मत्तः पृथिव्यां बलिनो नृपान्।
अपृच्छन्नारदस्तस्मै कथयामास यादवान् ॥ 6 ॥ 871

म्लेच्छकोटिसहस्राणां सहस्रैस्सोऽभिसंवृतः।
गजाश्वरथसम्पन्नैश्चकार परमोद्यमम् ॥ 7 ॥ 872

प्रययौ सोऽव्यवच्छिन्नं छिन्नयानो दिने दिने।
यादवान्प्रति सामर्षो मैत्रेय मथुरां पुरीम् ॥ 8 ॥ 873

कृष्णोऽपि चिन्तयामास क्षपितं यादवं बलम्।
यवनेन रणे गम्यं मागधस्य भविष्यति॥ 9॥ 874

मागधस्य बलं क्षीणं स कालयवनो बली।
हन्तैतदेवमायातं यदूनां व्यसनं द्विधा॥ 10॥ 875

तस्माद्दुर्गं करिष्यामि यदूनामरिदुर्जयम्।
स्त्रियोऽपि यत्र युद्धेयुः किं पुनर्वृष्णिपुङ्गवाः॥ 11॥ 876

मयि मत्ते प्रमत्ते वा सुप्ते प्रवसितेऽपि वा।
यादवाभिभवं दुष्टा मा कुर्वन्त्वरयोऽधिकाः॥ 12॥ 877

इति सञ्चिन्त्य गोविन्दो योजनानां महोदधिम्।
ययाचे द्वादश पुरीं द्वारकां तत्र निर्ममे॥ 13॥ 878

महोद्यानां महावप्रां तटाकशतशोभिताम्।
प्रासादगृहसम्बाधामिन्द्रस्येवामरावतीम्॥ 14॥ 879

मथुरावासिनं लोकं तत्रानीय जनार्दनः।
आसन्ने कालयवने मथुरां च स्वयं ययौ॥ 15॥ 880

बहिरावासिते सैन्ये मथुराया निरायुधः।
निर्जगाम च गोविन्दो ददर्श यवनश्च तम्॥ 16॥ 881

स ज्ञात्वा वासुदेवं तं बाहुप्रहरणं नृपः।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः॥ 17॥ 882

तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम्।
यत्र शेते महावीर्यो मुचुकुन्दो नरेश्वरः॥ 18॥ 883

सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्यागतं नृपम्।
पादेन ताडयामास मत्वा कृष्णं सुदुर्मतिः॥ 19॥ 884

उत्थाय मुचुकुन्दोऽपि ददर्श यवनं नृपः॥ 20॥ 885

दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना।
तत्क्रोधजेन मैत्रेय भस्मीभूतश्च तत्क्षणात्॥ 21॥ 886

स हि देवासुरे युद्धे गतो हत्वा महासुरान्।
निद्रार्त्तस्सुमहाकालं निद्रां वव्रे वरं सुरान्॥ 22॥ 887

प्रोक्तश्च देवैस्संसुप्तं यस्त्वामुत्थापयिष्यति।
देहजेनाग्निना सद्यस्स तु भस्मीभविष्यति॥ 23॥ 888

एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसूदनम्।
कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनः कुले।
वसुदेवस्य तनयो यदोर्वंशसमुद्भवः॥ 24॥ 889

मुचुकुन्दोऽपि तत्रासौ वृद्धगार्ग्यवचोऽस्मरत्॥ 25॥ 890

संस्मृत्य प्रणिपत्यैनं सर्वं सर्वेश्वरं हरिम्।
प्राह ज्ञातो भवान्विष्णोरंशस्त्वं परमेश्वर॥ 26॥ 891

पुरा गार्ग्येण कथितमष्टाविंशतिमे युगे।
द्वापरान्ते हरेर्जन्म यदुवंशे भविष्यति॥ 27॥ 892

स त्वं प्राप्तो न सन्देहो मर्त्यानामुपकारकृत्।
तथापि सुमहत्तेजो नालं सोढुमहं तव॥ 28॥ 893

तथा हि सजलाम्भोदनादधीरतरं तव।
वाक्यं नमति चैवोर्वी युष्मत्पादप्रपीडिता॥ 29॥ 894

देवासुरमहायुद्धे दैत्यसैन्यमहाभटाः।
न सेहुर्मम तेजस्ते त्वत्तेजो न सहाम्यहम्॥ 30॥ 895

संसारपतितस्यैको जन्तोस्त्वं शरणं परम्।
प्रसीद त्वं प्रपन्नार्तिहर नाशय मेऽशुभम्॥ 31॥ 896

त्वं पयोनिधयश्शैलसरितस्त्वं वनानि च।
मेदिनी गगनं वायुरापोऽग्निस्त्वं तथा मनः॥ 32॥ 897

बुद्धिरव्याकृतप्राणाः प्राणेशस्त्वं तथा पुमान्।
पुंसः परतरं यच्च व्याप्यजन्मविकारवत्॥ 33॥ 898

शब्दादिहीनमजरममेयं क्षयवर्जितम्।
अवृद्धिनाशं तद्ब्रह्म त्वमाद्यन्तविवर्जितम्॥ 34॥ 899

त्वत्तोऽमरास्सपितरो यक्षगन्धर्वकिन्नराः।
सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः॥ 35॥ 900

सरीसृपा मृगास्सर्वे त्वत्तस्सर्वे महीरुहाः।
यच्च भूतं भविष्यं च किञ्चिदत्र चराचरम्॥ 36॥ 901

मूर्तामूर्तं तथा चापि स्थूलं सूक्ष्मतरं तथा।
तत्सर्वं त्वं जगत्कर्ता नास्ति किञ्चित्त्वया विना॥ 37॥ 902

मया संसारचक्रेऽस्मिन्भ्रमता भगवन् सदा।
तापत्रयाभिभूतेन न प्राप्ता निर्वृतिः क्वचित्॥ 38॥ 903

दुःखान्येव सुखानीति मृगतृष्णा जलाशया।
मया नाथ गृहीतानि तानि तापाय मेऽभवन्॥ 39॥ 904

राज्यमुर्वी बलं कोशो मित्रपक्षस्तथात्मजाः।
भार्या भृत्यजनो ये च शब्दाद्या विषयाः प्रभो॥ 40॥ 905

सुखबुद्ध्या मया सर्वं गृहीतमिदमव्ययम्।
परिणामे तदेवेश तापात्मकमभून्मम॥ 41॥ 906

देवलोकगतिं प्राप्तो नाथ देवगणोऽपि हि।
मत्तस्साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः॥ **42**॥ 907

त्वामनाराध्य जगतां सर्वेषां प्रभवास्पदम्।
शाश्वती प्राप्यते केन परमेश्वर निर्वृतिः॥ **43**॥ 908

त्वन्मायामूढमनसो जन्ममृत्युजरादिकान्।
अवाप्य तापान्पश्यन्ति प्रेतराजमनन्तरम्॥ **44**॥ 909

ततो निजक्रियासूति नरकेष्वतिदारुणम्।
प्राप्नुवन्ति नरा दुःखमस्वरूपविदस्तव॥ **45**॥ 910

अहमत्यन्तविषयी मोहितस्तव मायया।
ममत्वगर्वगर्त्तान्तर्भ्रमामि परमेश्वर॥ **46**॥ 911

सोऽहं त्वां शरणमपारमप्रमेयं
सम्प्राप्तः परमपदं यतो न किञ्चित्।
संसारभ्रमपरितापतप्तचेता
निर्वाणे परिणतधाम्नि साभिलाषः॥ **47**॥ 912

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे त्रयोविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे चतुर्विंशोऽध्यायः ॥

श्रीपराशर उवाच

इत्थं स्तुतस्तदा तेन मुचुकुन्देन धीमता।
प्राहेशः सर्वभूतानामनादिनिधनो हरिः ॥ 1 ॥ 913

श्रीभगवानुवाच

यथाभिवाञ्छितान्दिव्यान्गच्छ लोकान्नराधिप।
अव्याहतपरैश्वर्यो मत्प्रसादोपबृंहितः ॥ 2 ॥ 914

भुक्त्वा दिव्यान्महाभोगान्भविष्यसि महाकुले।
जातिस्मरो मत्प्रसादात्ततो मोक्षमवाप्स्यसि ॥ 3 ॥ 915

श्रीपराशर उवाच

इत्युक्तः प्रणिपत्येशं जगतामच्युतं नृपः।
गुहामुखाद्विनिष्क्रान्तस्स ददर्शाल्पकान्नरान् ॥ 4 ॥ 916

ततः कलियुगं मत्वा प्राप्तं तप्तुं नृपस्तपः।
नरनारायणस्थानं प्रययौ गन्धमादनम् ॥ 5 ॥ 917

कृष्णोऽपि घातयित्वारिमुपायेन हि तद्बलम्।
जग्राह मथुरामेत्य हस्त्यश्वस्यन्दनोज्ज्वलम् ॥ 6 ॥ 918

आनीय चोग्रसेनाय द्वारवत्यां न्यवेदयत्।
पराभिभवनिश्शङ्कं बभूव च यदोः कुलम् ॥ 7 ॥ 919

बलदेवोऽपि मैत्रेय प्रशान्ताखिलविग्रहः।
ज्ञातिदर्शनसोत्कण्ठः प्रययौ नन्दगोकुलम्॥ 8॥ 920

ततो गोपांश्च गोपीश्च यथा पूर्वममित्रजित्।
तथैवाभ्यवदत्प्रेम्णा बहुमानपुरस्सरम्॥ 9॥ 921

स कैश्चित्सम्परिष्वक्तः कांश्चिच्च परिषस्वजे।
हास्यं चक्रे समं कैश्चिद्गोपैर्गोपीजनैस्तथा॥ 10॥ 922

प्रियाण्यनेकान्यवदन् गोपास्तत्र हलायुधम्।
गोप्यश्च प्रेमकुपिताः प्रोचुस्सेर्ष्यमथापराः॥ 11॥ 923

गोप्यः पप्रच्छुरपरा नागरीजनवल्लभः।
कच्चिदास्ते सुखं कृष्णश्चलप्रेमलवात्मकः॥ 12॥ 924

अस्मच्चेष्टामपहसन्न कच्चित्पुरयोषिताम्।
सौभाग्यमानमधिकं करोति क्षणसौहृदः॥ 13॥ 925

कच्चित्स्मरति नः कृष्णो गीतानुगमनं कलम्।
अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति॥ 14॥ 926

अथवा किं तदालापैः क्रियन्तामपराः कथाः।
यस्यास्माभिर्विना तेन विनास्माकं भविष्यति॥ 15॥ 927

पिता माता तथा भ्राता भर्ता बन्धुजनश्च किम्।
सन्त्यक्तस्तत्कृतेऽस्माभिरकृतज्ञध्वजो हि सः॥ 16॥ 928

तथापि कच्चिदालापमिहागमनसंश्रयम्।
करोति कृष्णो वक्तव्यं भवता राम नानृतम्॥ 17॥ 929

दामोदरोऽसौ गोविन्दः पुरस्त्रीसक्तमानसः।
अपेतप्रीतिरस्मासु दुर्दर्शः प्रतिभाति नः॥ 18॥ 930

श्रीपराशर उवाच

आमन्त्रितश्च कृष्णेति पुनर्दामोदरेति च।
जहसुस्सस्वरं गोप्यो हरिणा हृतचेतसः॥ 19॥ 931

सन्देशैस्साममधुरैः प्रेमगर्भैरगर्वितैः।
रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः॥ 20॥ 932

गोपैश्च पूर्ववद्रामः परिहासमनोहराः।
कथाश्चकार रेमे च सह तैर्व्रजभूमिषु॥ 21॥ 933

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे चतुर्विंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे पञ्चविंशोऽध्यायः ॥

श्रीपराशर उवाच

वने विचरतस्तस्य सह गोपैर्महात्मनः।
मानुषच्छद्मरूपस्य शेषस्य धरणीधृतः॥ 1 ॥ 934

निष्पादितोरुकार्यस्य कार्येणोर्वीप्रचारिणः।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम्॥ 2 ॥ 935

अभीष्टा सर्वदा यस्य मदिरे त्वं महौजसः।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे॥ 3 ॥ 936

इत्युक्ता वारुणी तेन सन्निधानमथाकरोत्।
वृन्दावनसमुत्पन्नकदम्बतरुकोटरे॥ 4 ॥ 937

विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम्।
आघ्राय मदिरातर्षमवापाथ वराननः॥ 5 ॥ 938

ततः कदम्बात्सहसा मद्यधारां स लाङ्गली।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम्॥ 6 ॥ 939

पपौ च गोपगोपीभिस्समुपेतो मुदान्वितः।
प्रगीयमानो ललितं गीतवाद्यविशारदैः॥ 7 ॥ 940

स मत्तोऽत्यन्तघर्माभ्भः कणिकामौक्तिकोज्ज्वलः।
आगच्छ यमुने स्नातुमिच्छामीत्याह विह्वलः॥ 8 ॥ 941

तस्य वाचं नदी सा तु मत्तोक्तामवमत्य वै।
नाजगाम ततः क्रुद्धो हलं जग्राह लाङ्गली॥ 9॥ 942

गृहीत्वा तां हलान्तेन चकर्ष मदविह्वलः।
पापे नायासि नायासि गम्यतामिच्छयान्यतः॥ 10॥ 943

साकृष्टा सहसा तेन मार्गं सन्त्यज्य निम्नगा।
यत्रास्ते बलभद्रोऽसौ प्लावयामास तद्वनम्॥ 11॥ 944

शरीरिणी तदाभ्येत्य त्रासविह्वललोचना।
प्रसीदेत्यब्रवीद्रामं मुञ्च मां मुसलायुध॥ 12॥ 945

ततस्तस्याः सुवचनमाकर्ण्य स हलायुधः।
सोऽब्रवीदवजानासि मम शौर्यबले नदि।
सोऽहं त्वां हलपातेन नयिष्यामि सहस्रधा॥ 13॥ 946

श्रीपराशर उवाच

इत्युक्तयातिसन्त्रासात्तया नद्या प्रसादितः।
भूभागे प्लाविते तस्मिन्मुमोच यमुनां बलः॥ 14॥ 947

ततस्स्नातस्य वै कान्तिरजायत महात्मनः॥ 15॥ 948

अवतंसोत्पलं चारु गृहीत्वैकं च कुण्डलम्।
वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम्।
समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत॥ 16॥ 949

कृतावतंसस्स्स तदा चारुकुण्डलभूषितः।
नीलाम्बरधरस्स्रग्वी शुशुभे कान्तिसंयुतः॥ 17॥ 950

इत्थं विभूषितो रेमे तत्र रामस्तथा व्रजे।
मासद्वयेन यातश्च स पुनर्द्वारकां पुरीम्॥ 18॥ 951

रेवतीं नाम तनयां रैवतस्य महीपतेः।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ॥ 19॥ 952

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे पञ्चविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे षड्विंशोऽध्यायः ॥

श्रीपराशर उवाच

भीष्मकः कुण्डिने राजा विदर्भविषयेऽभवत्।
रुक्मी तस्याभवत्पुत्रो रुक्मिणी च वरानना ॥ 1 ॥ 953

रुक्मिणीं चकमे कृष्णस्सा च तं चारुहासिनी।
न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे ॥ 2 ॥ 954

ददौ च शिशुपालाय जरासन्धप्रचोदितः।
भीष्मको रुक्मिणा सार्धं रुक्मिणीमुरुविक्रमः ॥ 3 ॥ 955

विवाहार्थं ततः सर्वे जरासन्धमुखा नृपाः।
भीष्मकस्य पुरं जग्मुश्शिशुपालप्रियैषिणः ॥ 4 ॥ 956

कृष्णोऽपि बलभद्राद्यैर्यदुभिः परिवारितः।
प्रययौ कुण्डिनं द्रष्टुं विवाहं चैद्यभूभृतः ॥ 5 ॥ 957

श्वोभाविनि विवाहे तु तां कन्यां हृतवान्हरिः।
विपक्षभारमासज्य रामादिष्वथ बन्धुषु ॥ 6 ॥ 958

ततश्च पौण्ड्रकश्श्रीमान्दन्तवक्त्रो विदूरथः।
शिशुपालजरासन्धशाल्वाद्याश्च महीभृतः ॥ 7 ॥ 959

कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमम्।
निर्जिताश्च समागम्य रामाद्यैर्यदुपुङ्गवैः ॥ 8 ॥ 960

कुण्डिनं न प्रवेक्ष्यामि ह्यहत्वा युधि केशवम्।
कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमनुद्रुतः॥ 9॥ 961

हत्वा बलं सनागाश्वं पत्तिस्यन्दनसङ्कुलम्।
निर्जितः पातितश्चोर्व्यां लीलयैव स चक्रिणा॥ 10॥ 962

निर्जित्य रुक्मिणं सम्यगुपयेमे च रुक्मिणीम्।
राक्षसेन विवाहेन सम्प्राप्तां मधुसूदनः॥ 11॥ 963

तस्यां जज्ञे च प्रद्युम्नो मदनांशस्सवीर्यवान्।
जहार शम्बरो यं वै यो जघान च शम्बरम्॥ 12॥ 964

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे षड्विंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे सप्तविंशोऽध्यायः ॥

श्रीमैत्रेय उवाच

शम्बरेण हृतो वीरः प्रद्युम्नः स कथं मुने।
शम्बरः स महावीर्यः प्रद्युम्नेन कथं हतः॥ 1 ॥ 965

यस्तेनापहृतः पूर्वं स कथं विजघान तम्।
एतद्विस्तरतः श्रोतुमिच्छामि सकलं गुरो॥ 2 ॥ 966

श्रीपराशर उवाच

षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात्।
ममैष हन्तेति मुने हृतवान्कालशम्बरः॥ 3 ॥ 967

हृत्वा चिक्षेप चैवैनं ग्राहोग्रे लवणार्णवे।
कल्लोलजनितावर्त्ते सुघोरे मकरालये॥ 4 ॥ 968

पातितं तत्र चैवैको मत्स्यो जग्राह बालकम्।
न ममार च तस्यापि जठराग्निप्रदीपितः॥ 5 ॥ 969

मत्स्यबन्धैश्च मत्स्यो ऽसौ मत्स्यैरन्यैस्सह द्विज।
घातितोऽसुरवर्याय शम्बराय निवेदितः॥ 6 ॥ 970

तस्य मायावती नामपत्नी सर्वगृहेश्वरी।
कारयामास सूदानामाधिपत्यमनिन्दिता॥ 7 ॥ 971

दारिते मत्स्यजठरे सा ददर्शातिशोभनम्।
कुमारं मन्मथतरोर्दग्धस्य प्रथमाङ्कुरम्॥ 8॥ 972

कोऽयं कथमयं मत्स्यजठरे प्रविवेशितः।
इत्येवं कौतुकाविष्टां तन्वीं प्राहाथ नारदः॥ 9॥ 973

अयं समस्तजगतः स्थितिसंहारकारिणः।
शम्बरेण हृतो विष्णोस्तनयः सूतिकागृहात्॥ 10॥ 974

क्षिप्तस्समुद्रे मत्स्येन निगीर्णस्ते गृहं गतः।
नररत्नमिदं सुभ्रु विस्रब्धा परिपालय॥ 11॥ 975

श्रीपराशर उवाच

नारदेनैवमुक्ता सा पालयामास तं शिशुम्।
बाल्यादेवातिरागेण रूपातिशयमोहिता॥ 12॥ 976

स यदा यौवनाभोगभूषितोऽभून्महामते।
साभिलाषा तदा सापि बभूव गजगामिनी॥ 13॥ 977

मायावती ददौ तस्मै मायास्सर्वा महामुने।
प्रद्युम्नायानुरागान्धा तन्न्यस्तहृदयेक्षणा॥ 14॥ 978

प्रसज्जन्तीं तु तां प्राह स कार्ष्णिः कमलेक्षणाम्।
मातृत्वमपहायाद्य किमेवं वर्तसेऽन्यथा॥ 15॥ 979

सा तस्मै कथयामास न पुत्रस्त्वं ममेति वै।
तनयं त्वामयं विष्णोर्हृतवान्कालशम्बरः॥ 16॥ 980

क्षिप्तः समुद्रे मत्स्यस्य सम्प्राप्तो जठरान्मया।
सा हि रोदिति ते माता कान्ताद्याप्यतिवत्सला॥ 17॥ 981

श्रीपराशर उवाच

इत्युक्तश्शम्बरं युद्धे प्रद्युम्नः स समाह्वयत्।
क्रोधाकुलीकृतमना युयुधे च महाबलः॥ 18 ॥ 982

हत्वा सैन्यमशेषं तु तस्य दैत्यस्य यादवः।
सप्त माया व्यतिक्रम्य मायां प्रयुयुजेऽष्टमीम्॥ 19 ॥ 983

तया जघान तं दैत्यं मायया कालशम्बरम्।
उत्पत्त्य च तया सार्धमाजगाम पितुः पुरम्॥ 20 ॥ 984

अन्तःपुरे निपतितं मायावत्या समन्वितम्।
तं दृष्ट्वा कृष्णसङ्कल्पा बभूवुः कृष्णयोषितः॥ 21 ॥ 985

रुक्मिणी साभवत्प्रेम्णा सास्रदृष्टिरनिन्दिता।
धन्यायाः खल्वयं पुत्रो वर्तते नवयौवने॥ 22 ॥ 986

अस्मिन्वयसि पुत्रो मे प्रद्युम्नो यदि जीवति।
सभाग्या जननी वत्स सा त्वया का विभूषिता॥ 23 ॥ 987

अथवा यादृशः स्नेहो मम यादृग्वपुस्तव।
हरेरपत्यं सुव्यक्तं भवान्वत्स भविष्यति॥ 24 ॥ 988

श्रीपराशर उवाच

एतस्मिन्नन्तरे प्राप्तस्सह कृष्णेन नारदः।
अन्तःपुरचरां देवीं रुक्मिणीं प्राह हर्षयन्॥ 25 ॥ 989

एष ते तनयः सुभ्रु हत्वा शम्बरमागतः।
हृतो येनाभवद्बालो भवत्यास्सूतिकागृहात्॥ 26 ॥ 990

इयं मायावती भार्या तनयस्यास्य ते सती।
शम्बरस्य न भार्येयं श्रूयतामत्र कारणम्॥ 27 ॥ 991

मन्मथे तु गते नाशं तदुद्भवपरायणा।
शम्बरं मोहयामास मायारूपेण रूपिणी॥ 28॥ 992

विहाराद्युपभोगेषु रूपं मायामयं शुभम्।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा॥ 29॥ 993

कामोऽवतीर्णः पुत्रस्ते तस्येयं दयिता रतिः।
विशङ्का नात्र कर्तव्या स्नुषेयं तव शोभने॥ 30॥ 994

ततो हर्षसमाविष्टौ रुक्मिणीकेशवौ तदा।
नगरी च समस्ता सा साधुसाध्वित्यभाषत॥ 31॥ 995

चिरं नष्टेन पुत्रेण सङ्गतां प्रेक्ष्य रुक्मिणीम्।
अवाप विस्मयं सर्वो द्वारवत्यां तदा जनः॥ 32॥ 996

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे सप्तविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे अष्टाविंशोऽध्यायः ॥

श्रीपराशर उवाच

चारुदेष्णं सुदेष्णं च चारुदेहं च वीर्यवान्।
सुषेणं चारुगुप्तं च भद्रचारुं तथा परम्॥ **1**॥ 997

चारुविन्दं सुचारुं च चारुं च बलिनां वरम्।
रुक्मिण्यजनयत्पुत्रान्कन्यां चारुमतीं तथा॥ **2**॥ 998

अन्याश्च भार्याः कृष्णस्य बभूवुः सप्त शोभनाः।
कालिन्दी मित्रविन्दा च सत्या नाग्नजिती तथा॥ **3**॥ 999

देवी जाम्बवती चापि रोहिणी कामरूपिणी।
मद्रराजसुता चान्या सुशीला शीलमण्डना॥ **4**॥ 1000

सात्राजिती सत्यभामा लक्ष्मणा चारुहासिनी।
षोडशासन् सहस्राणि स्त्रीणामन्यानि चक्रिणः॥ **5**॥ 1001

प्रद्युम्नोऽपि महावीर्यो रुक्मिणस्तनयां शुभाम्।
स्वयंवरे तां जग्राह सा च तं तनयं हरेः॥ **6**॥ 1002

तस्यामस्याभवत्पुत्रो महाबलपराक्रमः।
अनिरुद्धो रणेऽरुद्धवीर्योदधिररिन्दमः॥ **7**॥ 1003

तस्यापि रुक्मिणः पौत्रीं वरयामास केशवः।
दौहित्राय ददौ रुक्मी तां स्पर्द्धन्नपि चक्रिणा॥ **8**॥ 1004

तस्या विवाहे रामाद्या यादवा हरिणा सह।
रुक्मिणो नगरं जग्मुर्नाम्ना भोजकटं द्विज॥ **9**॥ 1005

विवाहे तत्र निर्वृत्ते प्राद्युम्नेस्तु महात्मनः।
कलिङ्गराजप्रमुखा रुक्मिणं वाक्यमब्रुवन्॥ **10**॥ 1006

अनक्षज्ञो हली द्यूते तथास्य व्यसनं महत्।
न जयामो बलं कस्माद्द्यूतेनैनं महाबलम्॥ **11**॥ 1007

श्रीपराशर उवाच

तथेति तानाह नृपान्रुक्मी बलमदान्वितः।
सभायां सह रामेण चक्रे द्यूतं च वै तदा॥ **12**॥ 1008

सहस्रमेकं निष्काणां रुक्मिणा विजितो बलः।
द्वितीयेऽपि पणे चान्यत्सहस्रं रुक्मिणा जितः॥ **13**॥ 1009

ततो दशसहस्राणि निष्काणां पणमाददे।
बलभद्रोऽजयत्तानि रुक्मी द्यूतविदां वरः॥ **14**॥ 1010

ततो जहास स्वनवत्कलिङ्गाधिपतिर्द्विज।
दन्तान्विदर्शयन्मूढो रुक्मी चाह मदोद्धतः॥ **15**॥ 1011

अविद्योऽयं मया द्यूते बलभद्रः पराजितः।
मुधैवाक्षावलेपान्धो योऽवमेनेऽक्षकोविदान्॥ **16**॥ 1012

दृष्ट्वा कलिङ्गराजन्तं प्रकाशदशाननम्।
रुक्मिणं चापि दुर्वाक्यं कोपं चक्रे हलायुधः॥ **17**॥ 1013

ततः कोपपरीतात्मा निष्ककोटिं समाददे।
ग्लहं जग्राह रुक्मी च तदर्थेऽक्षानपातयत्॥ **18**॥ 1014

अजयद्बलदेवस्तं प्राहोच्चैर्विजितं मया।
मयेति रुक्मी प्राहोच्चैरलीकोक्तेरलं बल॥ 19॥ 1015

त्वयोक्तोऽयं ग्लहस्सत्यं न मयैषोऽनुमोदितः।
एवं त्वया चेद्विजितं विजितं न मया कथम्॥ 20॥ 1016

श्रीपराशर उवाच

अथान्तरिक्षे वागुच्चैः प्राह गम्भीरनादिनी।
बलदेवस्य तं कोपं वर्द्धयन्ती महात्मनः॥ 21॥ 1017

जितं बलेन धर्मेण रुक्मिणा भाषितं मृषा।
अनुक्त्वापि वचः किञ्चित्कृतं भवति कर्मणा॥ 22॥ 1018

ततो बलः समुत्थाय कोपसंरक्तलोचनः।
जघानाष्टापदेनैव रुक्मिणं स महाबलः॥ 23॥ 1019

कलिङ्गराजं चादाय विस्फुरन्तं बलाद्बलः।
बभञ्ज दन्तान्कुपितो यैः प्रकाशं जहास सः॥ 24॥ 1020

आकृष्य च महास्तम्भं जातरूपमयं बलः।
जघान तान्ये तत्पक्षे भूभृतः कुपितो भृशम्॥ 25॥ 1021

ततो हाहाकृतं सर्वं पलायनपरं द्विज।
तद्राजमण्डलं भीतं बभूव कुपिते बले॥ 26॥ 1022

बलेन निहतं दृष्ट्वा रुक्मिणं मधुसूदनः।
नोवाच किञ्चिन्मैत्रेय रुक्मिणीबलयोर्भयात्॥ 27॥ 1023

ततोऽनिरुद्धमादाय कृतदारं द्विजोत्तम।
द्वारकामाजगामाथ यदुचक्रं च केशवः॥ 28॥ 1024

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे अष्टाविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे एकोनत्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

द्वारवत्यां स्थिते कृष्णे शक्रस्त्रिभुवनेश्वरः।
आजगामाथ मैत्रेय मत्तैरावतपृष्ठगः॥ 1 ॥ 1025

प्रविश्य द्वारकां सोऽथ समेत्य हरिणा ततः।
कथयामास दैत्यस्य नरकस्य विचेष्टितम्॥ 2 ॥ 1026

त्वया नाथेन देवानां मनुष्यत्वेऽपि तिष्ठता।
प्रशमं सर्वदुःखानि नीतानि मधुसूदन॥ 3 ॥ 1027

तपस्विव्यसनार्थाय सोऽरिष्टो धेनुकस्तथा।
प्रवृत्तो यस्तथा केशी ते सर्वे निहतास्त्वया॥ 4 ॥ 1028

कंसः कुवलयापीडः पूतना बालघातिनी।
नाशं नीतास्त्वया सर्वे येऽन्ये जगदुपद्रवाः॥ 5 ॥ 1029

युष्मद्दोर्दण्डसम्भूतिपरित्राते जगत्त्रये।
यज्वयज्ञांशसम्प्राप्त्या तृप्तिं यान्ति दिवौकसः॥ 6 ॥ 1030

सोऽहं साम्प्रतमायातो यन्निमित्तं जनार्दन।
तच्छ्रुत्वा तत्प्रतीकारप्रयत्नं कर्तुमर्हसि॥ 7 ॥ 1031

भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः।
करोति सर्वभूतानामुपघातमरिन्दम॥ 8 ॥ 1032

देवसिद्धासुरादीनां नृपाणां च जनार्दन।
हृत्वा तु सोऽसुरः कन्या रुरुधे निजमन्दिरे॥ 9॥ 1033

छत्रं यत्सलिलस्रावि तज्जहार प्रचेतसः।
मन्दरस्य तथा शृङ्गं हृतवान्मणिपर्वतम्॥ 10॥ 1034

अमृतस्राविणी दिव्ये मन्मातुः कृष्ण कुण्डले।
जहार सोऽसुरोऽदित्या वाञ्छत्यैरावतं गजम्॥ 11॥ 1035

दुर्नीतमेतद्गोविन्द मया तस्य निवेदितम्।
यदत्र प्रति कर्तव्यं तत्स्वयं परिमृश्यताम्॥ 12॥ 1036

श्रीपराशर उवाच

इति श्रुत्वा स्मितं कृत्वा भगवान्देवकीसुतः।
गृहीत्वा वासवं हस्ते समुत्तस्थौ वरासनात्॥ 13॥ 1037

सञ्चित्यागतमारुह्य गरुडं गगनेचरम्।
सत्यभामां समारोप्य ययौ प्राग्ज्योतिषं पुरम्॥ 14॥ 1038

आरुह्यैरावतं नागं शक्रोऽपि त्रिदिवं ययौ।
ततो जगाम कृष्णश्च पश्यतां द्वारकौकसाम्॥ 15॥ 1039

प्राग्ज्योतिषपुरस्यापि समन्ताच्छतयोजनम्।
आचिता मौरवैः पाशैः क्षुरान्तैर्भूर्द्विजोत्तम॥ 16॥ 1040

तांश्चिच्छेद हरिः पाशान्क्षिप्त्वा चक्रं सुदर्शनम्।
ततो मुरस्समुत्तस्थौ तं जघान च केशवः॥ 17॥ 1041

मुरस्य तनयान्सप्त सहस्रांस्तांस्ततो हरिः।
चक्रधाराग्निनिर्दग्धांश्चकार शलभानिव॥ 18॥ 1042

हत्वा मुरं हयग्रीवं तथा पञ्चजनं द्विज।
प्राग्ज्योतिषपुरं धीमांस्त्वरावान्समुपाद्रवत्॥ 19॥ 1043

नरकेणास्य तत्राभून्महासैन्येन संयुगम्।
कृष्णस्य यत्र गोविन्दो जघ्ने दैत्यान्सहस्रशः॥ 20॥ 1044

शस्त्रास्त्रवर्षं मुञ्चन्तं तं भौमं नरकं बली।
क्षिप्त्वा चक्रं द्विधा चक्रे चक्री दैतेयचक्रहा॥ 21॥ 1045

हते तु नरके भूमिर्गृहीत्वादितिकुण्डले।
उपतस्थे जगन्नाथं वाक्यं चेदमथाब्रवीत्॥ 22॥ 1046

पृथ्व्युवाच

यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना।
त्वत्स्पर्शसम्भवः पुत्रस्तदायं मय्यजायत॥ 23॥ 1047

सोऽयं त्वयैव दत्तो मे त्वयैव विनिपातितः।
गृहाण कुण्डले चेमे पालयास्य च सन्ततिम्॥ 24॥ 1048

भारावतरणार्थाय ममैव भगवानिमम्।
अंशेन लोकमायातः प्रसादसुमुखः प्रभो॥ 25॥ 1049

त्वं कर्ता च विकर्ता च संहर्ता प्रभवोऽप्ययः।
जगतां त्वं जगद्रूपः स्तूयतेऽच्युत किं तव॥ 26॥ 1050

व्याप्तिर्व्याप्यं क्रिया कर्ता कार्यं च भगवान्यथा।
सर्वभूतात्मभूतस्य स्तूयते तव किं तथा॥ 27॥ 1051

परमात्मा च भूतात्मा त्वमात्मा चाव्ययो भवान्।
यथा तथा स्तुतिर्नाथ किमर्थं ते प्रवर्तते॥ 28॥ 1052

प्रसीद सर्वभूतात्मन्नरकेण तु यत्कृतम्।
तत्क्षम्यतामदोषाय त्वत्सुतस्त्वन्निपातितः॥ 29॥ 1053

श्रीपराशर उवाच

तथेति चोक्त्वा धरणीं भगवान्भूतभावनः।
रत्नानि नरकावासाज्जग्राह मुनिसत्तम॥ 30॥ 1054

कन्यापुरे स कन्यानां षोडशातुलविक्रमः।
शताधिकानि ददृशे सहस्राणि महामुने॥ 31॥ 1055

चतुर्दंष्ट्रान्गजांश्चाग्र्यान् षड्ढहस्तांश्च दृष्टवान्।
काम्बोजानां तथाश्वानां नियुतान्येकविंशतिम्॥ 32॥ 1056

ताः कन्यास्तांस्तथा नागांस्तानश्वान् द्वारकां पुरीम्।
प्रापयामास गोविन्दस्सद्यो नरककिङ्करैः॥ 33॥ 1057

ददृशे वारुणं छत्रं तथैव मणिपर्वतम्।
आरोपयामास हरिर्गरुडे पतगेश्वरे॥ 34॥ 1058

आरुह्य च स्वयं कृष्णस्सत्यभामासहायवान्।
अदित्याः कुण्डले दातुं जगाम त्रिदशालयम्॥ 35॥ 1059

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे एकोनत्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे त्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

गरुडो वारुणं छत्रं तथैव मणिपर्वतम्।
सभार्यं च हृषीकेशं लीलयैव वहन्ययौ ॥ 1 ॥ 1060

ततश्शङ्खमुपाध्मासीत्स्वर्गद्वारगतो हरिः।
उपतस्थुस्तथा देवास्सार्घ्यहस्ता जनार्दनम् ॥ 2 ॥ 1061

स देवैरर्चितः कृष्णो देवमातुर्निवेशनम्।
सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम् ॥ 3 ॥ 1062

स तां प्रणम्य शक्रेण सह ते कुण्डलोत्तमे।
ददौ नरकनाशं च शशंसास्यै जनार्दनः ॥ 4 ॥ 1063

ततः प्रीता जगन्माता धातारं जगतां हरिम्।
तुष्टावादितिरव्यग्रा कृत्वा तत्प्रवणं मनः ॥ 5 ॥ 1064

अदितिरुवाच

नमस्ते पुण्डरीकाक्ष भक्तानामभयंकर।
सनातनात्मन् सर्वात्मन् भूतात्मन् भूतभावन ॥ 6 ॥ 1065

प्रणेतर्मनसो बुद्धेरिन्द्रियाणां गुणात्मक।
त्रिगुणातीत निर्द्वन्द्व शुद्धसत्त्व हृदि स्थित ॥ 7 ॥ 1066

सितदीर्घादिनिश्शेषकल्पनापरिवर्जित।
जन्मादिभिरसंस्पृष्ट स्वप्नादिपरिवर्जित॥ **8**॥ 1067

सन्ध्या रात्रिरहो भूमिर्गगनं वायुरम्बु च।
हुताशनो मनो बुद्धिर्भूतादिस्त्वं तथाच्युत॥ **9**॥ 1068

सर्गस्थितिविनाशानां कर्ता कर्तृपतिर्भवान्।
ब्रह्मविष्णुशिवाख्याभिरात्ममूर्तिभिरीश्वर॥ **10**॥ 1069

देवा दैत्यास्तथा यक्षा राक्षसास्सिद्धपन्नगाः।
कूष्माण्डाश्च पिशाचाश्च गन्धर्वा मनुजास्तथा॥ **11**॥ 1070

पशवश्च मृगाश्चैव पतंगाश्च सरीसृपाः।
वृक्षगुल्मलता बह्व्यः समस्तास्तृणजातयः॥ **12**॥ 1071

स्थूला मध्यास्तथा सूक्ष्मास्सूक्ष्मात्सूक्ष्मतराश्च ये।
देहभेदा भवान् सर्वे ये केचित्पुर्गलाश्रयाः॥ **13**॥ 1072

माया तवेयमज्ञातपरमार्थातिमोहिनी।
अनात्मन्यात्मविज्ञानं यया मूढो निरुद्ध्यते॥ **14**॥ 1073

अस्वे स्वमिति भावोऽत्र यत्पुंसामुपजायते।
अहं ममेति भावो यत्प्रायेणैवाभिजायते।
संसारमातुर्मायायास्तवैतन्नाथ चेष्टितम्॥ **15**॥ 1074

यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान्।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये॥ **16**॥ 1075

ब्रह्माद्यास्सकला देवा मनुष्याः पशवस्तथा।
विष्णुमायामहावर्तमोहान्धतमसावृताः॥ **17**॥ 1076

आराध्य त्वामभीप्सन्ते कामानात्मभवक्षयम्।
यदेते पुरुषा माया सैवेयं भगवंस्तव॥ **18**॥ 1077

मया त्वं पुत्रकामिन्या वैरिपक्षजयाय च।
आराधितो न मोक्षाय मायाविलसितं हि तत्॥ **19**॥ 1078

कौपीनाच्छादनप्राया वाञ्छा कल्पद्रुमादपि।
जायते यदपुण्यानां सोऽपराधः स्वदोषजः॥ **20**॥ 1079

तत्प्रसीदाखिलजगन्मायामोहकराव्यय।
अज्ञानं ज्ञानसद्भावभूतं भूतेश नाशय॥ **21**॥ 1080

नमस्ते चक्रहस्ताय शार्ङ्गहस्ताय ते नमः।
गदाहस्ताय ते विष्णो शङ्खहस्ताय ते नमः॥ **22**॥ 1081

एतत्पश्यामि ते रूपं स्थूलचिह्नोपलक्षितम्।
न जानामि परं यत्ते प्रसीद परमेश्वर॥ **23**॥ 1082

श्रीपराशर उवाच

अदित्यैवं स्तुतो विष्णुः प्रहस्याह सुरारणिम्।
माता देवि त्वमस्माकं प्रसीद वरदा भव॥ **24**॥ 1083

अदितिरुवाच

एवमस्तु तथेच्छा ते त्वमशेषैस्सुरासुरैः।
अजेयः पुरुषव्याघ्र मर्त्यलोके भविष्यसि॥ **25**॥ 1084

श्रीपराशर उवाच

ततः कृष्णस्य पत्नी च शक्रपल्या सहादितिम्।
सत्यभामा प्रणम्याह प्रसीदेति पुनः पुनः॥ **26**॥ 1085

अदितिरुवाच

मत्प्रसादान्न ते सुभ्रु जरा वैरूप्यमेव वा।
भविष्यत्यनवद्याङ्गि सुस्थिरं नवयौवनम्॥ 27॥ 1086

श्रीपराशर उवाच

अदित्या तु कृतानुज्ञो देवराजो जनार्दनम्।
यथावत्पूजयामास बहुमानपुरस्सरम्॥ 28॥ 1087

शची च सत्यभामायै पारिजातस्य पुष्पकम्।
न ददौ मानुषीं मत्वा स्वयं पुष्पैरलङ्कृता॥ 29॥ 1088

ततो ददर्श कृष्णोऽपि सत्यभामासहायवान्।
देवोद्यानानि हृद्यानि नन्दनादीनि सत्तम॥ 30॥ 1089

ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम्।
नित्याह्लादकरं ताम्रबालपल्लवशोभितम्॥ 31॥ 1090

मथ्यमानेऽमृते जातं जातरूपोपमत्वचम्।
पारिजातं जगन्नाथः केशवः केशिसूदनः॥ 32॥ 1091

तुतोष परमप्रीत्या तरुराजमनुत्तमम्।
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम।
कस्मान्न द्वारकामेष नीयते कृष्ण पादपः॥ 33॥ 1092

यदि चेत्त्वद्वचः सत्यं त्वमत्यर्थं प्रियेति मे।
मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः॥ 34॥ 1093

न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी।
सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत्प्रियम्॥ 35॥ 1094

सत्यं तद्यदि गोविन्द नोपचारकृतं मम।
तदस्तु पारिजातोऽयं मम गेहविभूषणम्॥ **36**॥ 1095

बिभ्रती पारिजातस्य केशपक्षेण मञ्जरीम्।
सपत्नीनामहं मध्ये शोभेयमिति कामये॥ **37**॥ 1096

श्रीपराशर उवाच

इत्युक्तस्स्य प्रहस्यैनां पारिजातं गरुत्मति।
आरोपयामास हरिस्तमूचुर्वनरक्षिणः॥ **38**॥ 1097

भो शची देवराजस्य महिषी तत्परिग्रहम्।
पारिजातं न गोविन्द हर्तुमर्हसि पादपम्॥ **39**॥ 1098

उत्पन्नो देवराजाय दत्तस्सोऽपि ददौ पुनः।
महिष्यै सुमहाभाग देव्यै शच्यै कुतूहलात्॥ **40**॥ 1099

शचीविभूषणार्थाय देवैरमृतमन्थने।
उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि॥ **41**॥ 1100

देवराजो मुखप्रेक्षी यस्यास्तस्याः परिग्रहम्।
मौढ्यात्प्रार्थयसे क्षेमी गृहीत्वैनं हि को व्रजेत्॥ **42**॥ 1101

अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण यास्यति।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः॥ **43**॥ 1102

तदलं सकलैर्देवैर्विग्रहेण तवाच्युत।
विपाककटु यत्कर्म तन्न शंसन्ति पण्डिताः॥ **44**॥ 1103

श्रीपराशर उवाच

इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी।
का शची पारिजातस्य को वा शक्रस्सुराधिपः॥ **45**॥ 1104

सामान्यस्सर्वलोकस्य यद्येषोऽमृतमन्थने।
समुत्पन्नस्तरुः कस्मादेको गृह्णाति वासवः॥ **46**॥ 1105

यथा सुरा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः।
सामान्यस्सर्वलोकस्य पारिजातस्तथा द्रुमः॥ **47**॥ 1106

भर्तृबाहुमहागर्वाद्रुणद्ध्येनमथो शची।
तत्कथ्यतामलं क्षान्त्या सत्या हारयति द्रुमम्॥ **48**॥ 1107

कथ्यतां च द्रुतं गत्वा पौलोम्या वचनं मम।
सत्यभामा वदत्येतदिति गर्वोद्धताक्षरम्॥ **49**॥ 1108

यदि त्वं दयिता भर्तुर्यदि वश्यः पतिस्तव।
मद्भर्तुर्हरतो वृक्षं तत्कारय निवारणम्॥ **50**॥ 1109

जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम्।
पारिजातं तथाप्येनं मानुषी हारयामि ते॥ **51**॥ 1110

श्रीपराशर उवाच

इत्युक्ता रक्षिणो गत्वा शच्याः प्रोचुर्यथोदितम्।
श्रुत्वा चोत्साहयामास शची शक्रं सुराधिपम्॥ **52**॥ 1111

ततस्समस्तदेवानां सैन्यैः परिवृतो हरिम्।
प्रययौ पारिजातार्थमिन्द्रो योद्धुं द्विजोत्तम॥ **53**॥ 1112

ततः परिघनिस्त्रिंशगदाशूलवरायुधाः।
बभूवुस्त्रिदशास्सज्जाः शक्रे वज्रकरे स्थिते॥ **54**॥ 1113

ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम्।
शक्रं देवपरीवारं युद्धाय समुपस्थितम्॥ **55**॥ 1114

चकार शङ्खनिर्घोषं दिशश्शब्देन पूरयन्।
मुमोच शरसङ्घातान्सहस्रायुतशश्शितान्॥ **56**॥ 1115

ततो दिशो नभश्चैव दृष्ट्वा शरशतैश्चितम्।
मुमुचुस्त्रिदशास्सर्वे ह्यस्त्रशस्त्राण्यनेकशः॥ **57**॥ 1116

एकैकमस्त्रं शस्त्रं च देवैर्मुक्तं सहस्रशः।
चिच्छेद लीलयैवेशो जगतां मधुसूदनः॥ **58**॥ 1117

पाशं सलिलराजस्य समाकृष्योरगाशनः।
चकार खण्डशश्चञ्च्वा बालपन्नगदेहवत्॥ **59**॥ 1118

यमेन प्रहितं दण्डं गदाविक्षेपखण्डितम्।
पृथिव्यां पातयामास भगवान् देवकीसुतः॥ **60**॥ 1119

शिबिकां च धनेशस्य चक्रेण तिलशो विभुः।
चकार शौरिरर्कं च दृष्टिदृष्टहतौजसम्॥ **61**॥ 1120

नीतोऽग्निश्शीततां बाणैर्द्रावितां वसवो दिशः।
चक्रविच्छिन्नशूलाग्रा रुद्रा भुवि निपातिताः॥ **62**॥ 1121

साध्या विश्वेऽथ मरुतो गन्धर्वाश्चैव सायकैः।
शार्ङ्गिणा प्रेरितैरस्ता व्योम्नि शाल्मलितूलवत्॥ **63**॥ 1122

गरुत्मानपि तुण्डेन पक्षाभ्यां च नखाङ्कुरैः।
भक्षयंस्ताडयन् देवान् दारयंश्च चचार वै॥ **64**॥ 1123

ततश्शरसहस्रेण देवेन्द्रमधुसूदनौ।
परस्परं ववर्षाते धाराभिरिव तोयदौ॥ **65**॥ 1124

ऐरावतेन गरुडो युयुधे तत्र संकुले।
देवैस्समस्तैर्युयुधे शक्रेण च जनार्दनः॥ **66**॥ 1125

भिन्नेष्वशेषबाणेषु शस्त्रेष्वस्त्रेषु च त्वरन्।
जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम्॥ 67॥ 1126

ततो हाहाकृतं सर्वं त्रैलोक्यं द्विजसत्तम।
वज्रचक्रकरौ दृष्ट्वा देवराजजनार्दनौ॥ 68॥ 1127

क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान्हरिः।
न मुमोच तदा चक्रं शक्रं तिष्ठेति चाब्रवीत्॥ 69॥ 1128

प्रणष्टवज्रं देवेन्द्रं गरुडक्षतवाहनम्।
सत्यभामाब्रवीद्धीरं पलायनपरायणम्॥ 70॥ 1129

त्रैलोक्येश न ते युक्तं शचीभर्तुः पलायनम्।
पारिजातस्रगाभोगा त्वामुपस्थास्यते शची॥ 71॥ 1130

कीदृशं देवराज्यं ते पारिजातस्रगुज्ज्वलाम्।
अपश्यतो यथापूर्वं प्रणयाभ्यागतां शचीम्॥ 72॥ 1131

अलं शक्र प्रयासेन न व्रीडां गन्तुमर्हसि।
नीयतां पारिजातोऽयं देवास्सन्तु गतव्यथाः॥ 73॥ 1132

पतिगर्वावलेपेन बहुमानपुरस्सरम्।
न ददर्श गृहं यातामुपचारेण मां शची॥ 74॥ 1133

स्त्रीत्वादगुरुचित्ताहं स्वभर्तृश्लाघनापरा।
ततः कृतवती शक्र भवता सह विग्रहम्॥ 75॥ 1134

तदलं पारिजातेन परस्वेन हृतेन मे।
रूपेण गर्विता सा तु भर्त्रा का स्त्री न गर्विता॥ 76॥ 1135

श्रीपराशर उवाच

इत्युक्तो वै निववृते देवराजस्तया द्विज।
प्राह चैनामलं चण्डि सख्युः खेदोक्तिविस्तरैः॥ 77॥ 1136

न चापि सर्गसंहारस्थितिकर्ताखिलस्य यः।
जितस्य तेन मे व्रीडा जायते विश्वरूपिणा॥ 78॥ 1137

यस्माज्जगत्सकलमेतदनादिमध्या -
द्यस्मिन्यतश्च न भविष्यति सर्वभूतात्।
तेनोद्भवप्रलयपालनकारणेन
व्रीडा कथं भवति देवि निराकृतस्य॥ 79॥ 1138

सकलभुवनसूतिर्मूर्तिरल्पाल्पसूक्ष्मा
विदितसकलवेदैर्ज्ञायते यस्य नान्यैः।
तमजमकृतमीशं शाश्वतं स्वेच्छयैनं
जगदुपकृतिमर्त्यं को विजेतुं समर्थः॥ 80॥ 1139

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे त्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे एकत्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

संस्तुतो भगवानित्थं देवराजेन केशवः।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ॥ 1 ॥ 1140

श्रीकृष्ण उवाच

देवराजो भवानिन्द्रो वयं मर्त्या जगत्पते।
क्षन्तव्यं भवतैवेदमपराधं कृतं मम ॥ 2 ॥ 1141

पारिजाततरुश्चायं नीयतामुचितास्पदम्।
गृहीतोऽयं मया शक्र सत्यावचनकारणात् ॥ 3 ॥ 1142

वज्रं चेदं गृहाण त्वं यदत्र प्रहितं त्वया।
तवैवैतत्प्रहरणं शक्र वैरिविदारणम् ॥ 4 ॥ 1143

इन्द्र उवाच

विमोहयसि मामीश मर्त्योऽहमिति किं वदन्।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥ 5 ॥ 1144

योऽसि सोऽसि जगत्त्राणप्रवृत्तो नाथ संस्थितः।
जगतश्शल्यनिष्कर्षं करोष्यसुरसूदन ॥ 6 ॥ 1145

नीयतां पारिजातोऽयं कृष्ण द्वारवतीं पुरीम्।
मर्त्यलोके त्वया त्यक्ते नायं संस्थास्यते भुवि ॥ 7 ॥ 1146

देवदेव जगन्नाथ कृष्ण विष्णो महाभुज।
शङ्खचक्रगदापाणे क्षमस्वैतद्व्यतिक्रमम्॥ 8॥ 1147

श्रीपराशर उवाच

तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः।
प्रसक्तैः सिद्धगन्धर्वैः स्तूयमानः सुरर्षिभिः॥ 9॥ 1148

ततश्शङ्खमुपाध्माय द्वारकोपरि संस्थितः।
हर्षमुत्पादयामास द्वारकावासिनां द्विज॥ 10॥ 1149

अवतीर्याथ गरुडात्सत्यभामासहायवान्।
निष्कुटे स्थापयामास पारिजातं महातरुम्॥ 11॥ 1150

यमभ्येत्य जनस्सर्वो जातिं स्मरति पौर्विकीम्।
वास्यते यस्य पुष्पोत्थगन्धेनोर्वी त्रियोजनम्॥ 12॥ 1151

ततस्ते यादवास्सर्वे देहबन्धानमानुषान्।
ददृशुः पादपे तस्मिन् कुर्वन्तो मुखदर्शनम्॥ 13॥ 1152

किंकरैस्समुपानीतं हस्त्यश्वादि ततो धनम्।
विभज्य प्रददौ कृष्णो बान्धवानां महामतिः॥ 14॥ 1153

कन्याश्च कृष्णो जग्राह नरकस्य परिग्रहान्॥ 15॥ 1154

ततः काले शुभे प्राप्ते उपयेमे जनार्दनः।
ताः कन्या नरकेणासन्सर्वतो यास्समाहृताः॥ 16॥ 1155

एकस्मिन्नेव गोविन्दः काले तासां महामुने।
जग्राह विधिवत्पाणीन्पृथग्गेहेषु धर्मतः॥ 17॥ 1156

षोडशस्त्रीसहस्राणि शतमेकं ततोऽधिकम्।
तावन्ति चक्रे रूपाणि भगवान् मधुसूदनः॥ **18**॥ 1157

एकैकमेव ताः कन्या मेनिरे मधुसूदनः।
ममैव पाणिग्रहणं मैत्रेय कृतवानिति॥ **19**॥ 1158

निशासु च जगत्स्रष्टा तासां गेहेषु केशवः।
उवास विप्र सर्वासां विश्वरूपधरो हरिः॥ **20**॥ 1159

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे एकत्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे द्वात्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

प्रद्युम्नाद्या हरेः पुत्रा रुक्मिण्यां कथितास्तव।
भानुभौमेरिकाद्यांश्च सत्यभामा व्यजायत ॥ 1 ॥ 1160

दीप्तिमत्ताम्रपक्षाद्या रोहिण्यां तनया हरेः।
बभूवुर्जाम्बवत्यां च साम्बाद्या बलशालिनः ॥ 2 ॥ 1161

तनया भद्रविन्दाद्या नाग्नजित्यां महाबलाः।
सङ्ग्रामजित्प्रधानास्तु शैव्यायां च हरेस्सुताः ॥ 3 ॥ 1162

वृकाद्याश्च सुता माद्र्यां गात्रवत्प्रमुखान्सुतान्।
अवाप लक्ष्मणा पुत्रान्कालिन्द्याश्च श्रुतादयः ॥ 4 ॥ 1163

अन्यासां चैव भार्याणां समुत्पन्नानि चक्रिणः।
अष्टायुतानि पुत्राणां सहस्राणि शतं तथा ॥ 5 ॥ 1164

प्रद्युम्नः प्रथमस्तेषां सर्वेषां रुक्मिणीसुतः।
प्रद्युम्नादनिरुद्धोऽभूद्वज्रस्तस्मादजायत ॥ 6 ॥ 1165

अनिरुद्धो रणेऽरुद्धो बलेः पौत्रीं महाबलः।
उषां बाणस्य तनयामुपयेमे द्विजोत्तम ॥ 7 ॥ 1166

यत्र युद्धमभूद्घोरं हरिशङ्करयोर्महत्।
छिन्नं सहस्रं बाहूनां यत्र बाणस्य चक्रिणा ॥ 8 ॥ 1167

श्रीमैत्रेय उवाच

कथं युद्धमभूद्ब्रह्मन्नुषार्थे हरकृष्णयोः।
कथं क्षयं च बाणस्य बाहूनां कृतवान्हरिः॥ 9॥ 1168

एतत्सर्वं महाभाग ममाख्यातुं त्वमर्हसि।
महत्कौतूहलं जातं कथां श्रोतुमिमां हरेः॥ 10॥ 1169

श्रीपराशर उवाच

उषा बाणसुता विप्र पार्वतीं सह शम्भुना।
क्रीडन्तीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम्॥ 11॥ 1170

ततस्सकलचित्तज्ञा गौरी तामाह भामिनीम्।
अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे॥ 12॥ 1171

इत्युक्ता सा तया चक्रे कदेति मतिमात्मनः।
को वा भर्ता ममेत्याह पुनस्तामाह पार्वती॥ 13॥ 1172

पार्वत्युवाच

वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव।
करिष्यति स ते भर्ता राजपुत्रि भविष्यति॥ 14॥ 1173

श्रीपराशर उवाच

तस्यां तिथावुषास्वप्ने यथा देव्या समीरितम्।
तथैवाभिभवं चक्रे कश्चिद्रागं च तत्र सा॥ 15॥ 1174

ततः प्रबुद्धा पुरुषमपश्यन्ती समुत्सुका।
क्व गतोऽसीति निर्लज्जा मैत्रेयोक्तवती सखीम्॥ 16॥ 1175

बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।
तस्याः सख्यभवत्सा च प्राह कोऽयं त्वयोच्यते॥ 17॥ 1176

यदा लज्जाकुला नास्यै कथयामास सा सखी।
तदा विश्वासमानीय सर्वमेवाभ्यवादयत्॥ 18॥ 1177

विदितार्थं तु तामाह पुनश्चोषा यथोदितम्।
देव्या तथैव तत्प्राप्तौ यो ह्युपायः कुरुष्व तम्॥ 19॥ 1178

चित्रलेखोवाच

दुर्विज्ञेयमिदं वक्तुं प्राप्तुं वापि न शक्यते।
तथापि किञ्चित्कर्तव्यमुपकारं प्रिये तव॥ 20॥ 1179

सप्ताष्टदिनपर्यन्तं तावत्कालः प्रतीक्ष्यताम्।
इत्युक्त्वाभ्यन्तरं गत्वा उपायं तमथाकरोत्॥ 21॥ 1180

श्रीपराशर उवाच

ततः पटे सुरान्दैत्यान्गन्धर्वांश्च प्रधानतः।
मनुष्यांश्च विलिख्यास्यै चित्रलेखा व्यदर्शयत्॥ 22॥ 1181

अपास्य सा तु गन्धर्वांस्तथोरगसुरासुरान्।
मनुष्येषु ददौ दृष्टिं तेष्वप्यन्धकवृष्णिषु॥ 23॥ 1182

कृष्णरामौ विलोक्यासीत्सुभ्रूर्लज्जाजडेव सा।
प्रद्युम्नदर्शने व्रीडादृष्टिं निन्येऽन्यतो द्विज॥ 24॥ 1183

दृष्टमात्रे ततः कान्ते प्रद्युम्नतनये द्विज।
दृष्ट्वात्यर्थविलासिन्या लज्जा क्वापि निराकृता॥ 25॥ 1184

सोऽयं सोऽयमितीत्युक्ते तया सा योगगामिनी।
चित्रलेखाब्रवीदेनामुषां बाणसुतां तदा॥ 26॥ 1185

चित्रलेखोवाच

अयं कृष्णस्य पौत्रस्ते भर्ता देव्या प्रसादितः।
अनिरुद्ध इति ख्यातः प्रख्यातः प्रियदर्शनः॥ **27**॥ 1186

प्राप्नोषि यदि भर्तारमिमं प्राप्तं त्वयाखिलम्।
दुष्प्रवेशा पुरी पूर्वं द्वारका कृष्णपालिता॥ **28**॥ 1187

तथापि यत्नाद्भर्तारमानयिष्यामि ते सखि।
रहस्यमेतद्वक्तव्यं न कस्यचिदपि त्वया॥ **29**॥ 1188

अचिरादागमिष्यामि सहस्व विरहं मम।
ययौ द्वारवतीं चोषां समाश्वास्य ततः सखीम्॥ **30**॥ 1189

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे द्वात्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे त्रयस्त्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

बाणोऽपि प्रणिपत्याग्रे मैत्रेयाह त्रिलोचनम्।
देव बाहुसहस्रेण निर्विण्णोऽस्म्याहवं विना ॥ 1 ॥ 1190

कच्चिन्ममैषां बाहूनां साफल्यजनको रणः।
भविष्यति विना युद्धं भाराय मम किं भुजैः ॥ 2 ॥ 1191

श्रीशंकर उवाच

मयूरध्वजभङ्गस्ते यदा बाण भविष्यति।
पिशिताशिजनानन्दं प्राप्स्यसे त्वं तदा रणम् ॥ 3 ॥ 1192

श्रीपराशर उवाच

ततः प्रणम्य वरदं शम्भुमभ्यागतो गृहम्।
सभग्नं ध्वजमालोक्य हृष्टो हर्षं पुनर्ययौ ॥ 4 ॥ 1193

एतस्मिन्नेव काले तु योगविद्याबलेन तम्।
अनिरुद्धमथानिन्ये चित्रलेखा वराप्सराः ॥ 5 ॥ 1194

कन्यान्तःपुरमभ्येत्य रममाणं सहोषया।
विज्ञाय रक्षिणो गत्वा शशंसुर्दैत्यभूपतेः ॥ 6 ॥ 1195

व्यादिष्टं किंकराणां तु सैन्यं तेन महात्मना।
जघान परिघं घोरमादाय परवीरहा ॥ 7 ॥ 1196

हतेषु तेषु बाणोऽपि रथस्थस्तद्वधोद्यतः।
युध्यमानो यथाशक्ति यदुवीरेण निर्जितः॥ 8॥ 1197

मायया युयुधे तेन स तदा मन्त्रिचोदितः।
ततस्तं पन्नगास्त्रेण बबन्ध यदुनन्दनम्॥ 9॥ 1198

द्वारवत्यां क्व यातोऽसावनिरुद्धेति जल्पताम्।
यदूनामाचचक्षे तं बद्धं बाणेन नारदः॥ 10॥ 1199

तं शोणितपुरं नीतं श्रुत्वा विद्याविदग्धया।
योषिता प्रत्ययं जग्मुर्यादवा नामरैरिति॥ 11॥ 1200

ततो गरुडमारुह्य स्मृतमात्रागतं हरिः।
बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरम्॥ 12॥ 1201

पुरप्रवेशे प्रमथैर्युद्धमासीन्महात्मनः।
ययौ बाणपुराभ्याशं नीत्वा तान्सङ्क्षयं हरिः॥ 13॥ 1202

ततस्त्रिपादस्त्रिशिरा ज्वरो माहेश्वरो महान्।
बाणरक्षार्थमभ्येत्य युयुधे शार्ङ्गधन्वना॥ 14॥ 1203

तद्भस्मस्पर्शसम्भूतापः कृष्णाङ्गसङ्गमात्।
अवाप बलदेवोऽपि श्रममामीलितेक्षणः॥ 15॥ 1204

ततस्स युद्ध्यमानस्तु सह देवेन शार्ङ्गिणा।
वैष्णवेन ज्वरेणाशु कृष्णदेहान्निराकृतः॥ 16॥ 1205

नारायणभुजाघातपरिपीडनविह्वलम्।
तं वीक्ष्य क्षम्यतामस्येत्याह देवः पितामहः॥ 17॥ 1206

ततश्च क्षान्तमेवेति प्रोच्य तं वैष्णवं ज्वरम्।
आत्मन्येव लयं निन्ये भगवान्मधुसूदनः॥ 18॥ 1207

ज्वर उवाच

मम त्वया समं युद्धं ये स्मरिष्यन्ति मानवाः।
विज्वरास्ते भविष्यन्तीत्युक्त्वा चैनं ययौ ज्वरः॥ 19॥ 1208

ततोऽग्नीन्भगवान्पञ्च जित्वा नीत्वा तथा क्षयम्।
दानवानां बलं कृष्णश्चूर्णयामास लीलया॥ 20॥ 1209

ततस्समस्तसैन्येन दैतेयानां बलेस्सुतः।
युयुधे शङ्करश्चैव कार्त्तिकेयश्च शौरिणा॥ 21॥ 1210

हरिशङ्करयोर्युद्धमतीवासीत्सुदारुणम्।
चुक्षुभुस्सकला लोकाः शस्त्रास्त्रांशुप्रतापिताः॥ 22॥ 1211

प्रलयोऽयमशेषस्य जगतो नूनमागतः।
मेनिरे त्रिदशास्तत्र वर्तमाने महारणे॥ 23॥ 1212

जृम्भकास्त्रेण गोविन्दो जृम्भयामास शंकरम्।
ततः प्रणेशुर्दैतेयाः प्रमथाश्च समन्ततः॥ 24॥ 1213

जृम्भाभिभूतस्तु हरो रथोपस्थ उपाविशत्।
न शशाक ततो योद्धुं कृष्णेनाक्लिष्टकर्मणा॥ 25॥ 1214

गरुडक्षतवाहश्च प्रद्युम्नास्त्रेण पीडितः।
कृष्णहुङ्कारनिर्धूतशक्तिश्चापययौ गुहः॥ 26॥ 1215

जृम्भिते शङ्करे नष्टे दैत्यसैन्ये गुहे जिते।
नीते प्रमथसैन्ये च सङ्ख्यं शार्ङ्गधन्वना॥ 27॥ 1216

नन्दिना संगृहीताश्वमधिरुढो महारथम्।
बाणस्तत्राययौ योद्धुं कृष्णकार्ष्णिबलैस्सह॥ 28॥ 1217

बलभद्रो महावीर्यो बाणसैन्यमनेकधा।
विव्याध बाणैः प्रभ्रश्य धर्मतश्च पलायत॥ 29॥ 1218

आकृष्य लाङ्गलाग्रेण मुसलेनाशु ताडितम्।
बलं बलेन ददृशे बाणो बाणैश्च चक्रिणा॥ 30॥ 1219

ततः कृष्णेन बाणस्य युद्धमासीत्सुदारुणम्।
समस्यतोरिषून्दीप्तान्कायन्त्राणविभेदिनः॥ 31॥ 1220

कृष्णश्चिच्छेद बाणैस्तान्बाणेन प्रहिताञ्छितान्।
विव्याध केशवं बाणो बाणं विव्याध चक्रधृक्॥ 32॥ 1221

मुमुचाते तथास्त्राणि बाणकृष्णौ जिगीषया।
परस्परं क्षतिकरौ लाघवादनिशं द्विज॥ 33॥ 1222

भिद्यमानेष्वशेषेषु शरेष्वस्त्रे च सीदति।
प्राचुर्येण ततो बाणं हन्तुं चक्रे हरिर्मनः॥ 34॥ 1223

ततोऽर्कशतसङ्घाततेजसा सदृशद्युति।
जग्राह दैत्यचक्रारिर्हरिश्चक्रं सुदर्शनम्॥ 35॥ 1224

मुञ्चतो बाणनाशाय ततश्चक्रं मधुद्विषः।
नग्ना दैतेयविद्याभूत्कोटरी पुरतो हरेः॥ 36॥ 1225

तामग्रतो हरिर्दृष्ट्वा मीलिताक्षस्सुदर्शनम्।
मुमोच बाणमुद्दिश्यच्छेत्तुं बाहुवनं रिपोः॥ 37॥ 1226

क्रमेण तत्तु बाहूनां बाणस्याच्युतचोदितम्।
छेदं चक्रेऽसुरापास्तशस्त्रौघक्षपणादृतम्॥ 38॥ 1227

छिन्ने बाहुवने तत्तु करस्थं मधुसूदनः।
मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा॥ 39॥ 1228

समुपेत्याह गोविन्दं सामपूर्वमुमापतिः।
विलोक्य बाणं दोर्दण्डच्छेदासृक्स्रावववर्षिणम्॥ 40॥ 1229

श्रीशंकर उवाच

कृष्ण कृष्ण जगन्नाथ जाने त्वां पुरुषोत्तमम्।
परेशं परमात्मानमनादिनिधनं हरिम्॥ 41॥ 1230

देवतिर्यङ्मनुष्येषु शरीरग्रहणात्मिका।
लीलेयं सर्वभूतस्य तव चेष्टोपलक्षणा॥ 42॥ 1231

तत्प्रसीदाभयं दत्तं बाणस्यास्य मया प्रभो।
तत्त्वया नानृतं कार्यं यन्मया व्याहृतं वचः॥ 43॥ 1232

अस्मत्संश्रयदृप्तोऽयं नापराधी तवाव्यय।
मया दत्तवरो दैत्यस्ततस्त्वां क्षमयाम्यहम्॥ 44॥ 1233

श्रीपराशर उवाच

इत्युक्तः प्राह गोविन्दः शूलपाणिमुमापतिम्।
प्रसन्नवदनो भूत्वा गतामर्षोऽसुरं प्रति॥ 45॥ 1234

श्रीभगवानुवाच

युष्मद्दत्तवरो वाणो जीवतामेष शङ्कर।
त्वद्वाक्यगौरवादेतन्मया चक्रं निवर्तितम्॥ 46॥ 1235

त्वया यदभयं दत्तं तद्दत्तमखिलं मया।
मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शङ्कर॥ 47॥ 1236

योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम्।
मत्तो नान्यदशेषं यत्तत्त्वं ज्ञातुमिहार्हसि॥ 48॥ 1237

अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः।
वदन्ति भेदं पश्यन्ति चावयोरन्तरं हर॥ 49॥ 1238

प्रसन्नोऽहं गमिष्यामि त्वं गच्छ वृषभध्वज॥ 50॥ 1239

श्रीपराशर उवाच

इत्युक्त्वा प्रययौ कृष्णः प्राद्युम्निर्यत्र तिष्ठति।
तद्बन्धफणिनो नेशुर्गरुडानिलपोथिताः॥ 51॥ 1240

ततोऽनिरुद्धमारोप्य सपत्नीकं गरुत्मति।
आजग्मुर्द्वारकां रामकाष्णिदामोदराः पुरीम्॥ 52॥ 1241

पुत्रपौत्रैः परिवृतस्तत्र रेमे जनार्दनः।
देवीभिस्सततं विप्र भूभारतरणेच्छया॥ 53॥ 1242

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे त्रयस्त्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे चतुस्त्रिंशोऽध्यायः ॥

श्रीमैत्रेय उवाच

चक्रे कर्म महच्छौरिर्बिभ्राणो मानुषीं तनुम्।
जिगाय शक्रं शर्वं च सर्वान्देवांश्च लीलया ॥ 1 ॥ 1243

यच्चान्यदकरोत्कर्म दिव्यचेष्टाविघातकृत्।
तत्कथ्यतां महाभाग परं कौतूहलं हि मे ॥ 2 ॥ 1244

श्रीपराशर उवाच

गदतो मम विप्रर्षे श्रूयतामिदमादरात्।
नरावतारे कृष्णेन दग्धा वाराणसी यथा ॥ 3 ॥ 1245

पौण्ड्रको वासुदेवस्तु वासुदेवोऽभवद्भुवि।
अवतीर्णस्त्वमित्युक्तो जनैरज्ञानमोहितैः ॥ 4 ॥ 1246

स मेने वासुदेवोऽहमवतीर्णो महीतले।
नष्टस्मृतिस्ततस्सर्वं विष्णुचिह्नमचीकरत् ॥ 5 ॥ 1247

दूतं च प्रेषयामास कृष्णाय सुमहात्मने।
त्यक्त्वा चक्रादिकं चिह्नं मदीयं नाम चात्मनः ॥ 6 ॥ 1248

वासुदेवात्मकं मूढ त्यक्त्वा सर्वमशेषतः।
आत्मनो जीवितार्थाय ततो मे प्रणतिं व्रज ॥ 7 ॥ 1249

इत्युक्तस्सम्प्रहस्यैनं दूतं प्राह जनार्दनः।
निजचिह्नमहं चक्रं समुत्स्रक्ष्ये त्वयीति वै॥ 8॥ 1250

वाच्यश्च पौण्ड्रको गत्वा त्वया दूत वचो मम।
ज्ञातस्त्वद्वाक्यसद्भावो यत्कार्यं तद्विधीयताम्॥ 9॥ 1251

गृहीतचिह्नवेषोऽहमागमिष्यामि ते पुरम्।
उत्स्रक्ष्यामि च तच्चक्रं निजचिह्नमसंशयम्॥ 10॥ 1252

आज्ञापूर्वं च यदिदमागच्छेति त्वयोदितम्।
सम्पादयिष्ये श्वस्तुभ्यं समागम्याविलम्बितम्॥ 11॥ 1253

शरणं ते समभ्येत्य कर्तास्मि नृपते तथा।
यथा त्वत्तो भयं भूयो न मे किञ्चिद्भविष्यति॥ 12॥ 1254

श्रीपराशर उवाच

इत्युक्तेऽपगते दूते संस्मृत्याभ्यागतं हरिः।
गरुत्मन्तमथारुह्य त्वरितस्तत्पुरं ययौ॥ 13॥ 1255

ततस्तु केशवोद्योगं श्रुत्वा काशिपतिस्तदा।
सर्वसैन्यपरीवारः पार्ष्णिग्राह उपाययौ॥ 14॥ 1256

ततो बलेन महता काशिराजबलेन च।
पौण्ड्रको वासुदेवोऽसौ केशवाभिमुखो ययौ॥ 15॥ 1257

तं ददर्श हरिर्दूरादुदारस्यन्दने स्थितम्।
चक्रहस्तं गदाशार्ङ्गबाहुं पाणिगताम्बुजम्॥ 16॥ 1258

स्रग्धरं पीतवसनं सुपर्णरचितध्वजम्।
वक्षःस्थले कृतं चास्य श्रीवत्सं ददृशे हरिः॥ 17॥ 1259

किरीटकुण्डलधरं नानारत्नोपशोभितम्।
तं दृष्ट्वा भावगम्भीरं जहास गरुडध्वजः॥ 18॥ 1260

युयुधे च बलेनास्य हस्त्यश्वबलिना द्विज।
निस्त्रिंशासिगदाशूलशक्तिकार्मुकशालिना॥ 19॥ 1261

क्षणेन शार्ङ्गनिर्मुक्तैश्शरैररिविदारणैः।
गदाचक्रनिपातैश्च सूदयामास तद्बलम्॥ 20॥ 1262

काशिराजबलं चैवं क्षयं नीत्वा जनार्दनः।
उवाच पौण्ड्रकं मूढमात्मचिह्नोपलक्षितम्॥ 21॥ 1263

श्रीभगवानुवाच

पौण्ड्रकोक्तं त्वया यत्तु दूतवक्त्रेण मां प्रति।
समुत्सृजेति चिह्नानि तत्ते सम्पादयाम्यहम्॥ 22॥ 1264

चक्रमेतत्समुत्सृष्टं गदेयं ते विसर्जिता।
गरुत्मानेष चोत्सृष्टस्समारोहतु ते ध्वजम्॥ 23॥ 1265

श्रीपराशर उवाच

इत्युच्चार्य विमुक्तेन चक्रेणासौ विदारितः।
पातितो गदया भग्नो ध्वजश्चास्य गरुत्मता॥ 24॥ 1266

ततो हाहाकृते लोके काशिपुर्यधिपो बली।
युयुधे वासुदेवेन मित्रस्यापचितौ स्थितः॥ 25॥ 1267

ततश्शार्ङ्गधनुर्मुक्तैश्छित्त्वा तस्य शिरश्शरैः।
काशिपुर्यां स चिक्षेप कुर्वल्लोकस्य विस्मयम्॥ 26॥ 1268

हत्वा तं पौण्ड्रकं शौरिः काशिराजं च सानुगम्।
पुनर्द्वारवतीं प्राप्तो रेमे स्वर्गगतो यथा॥ 27॥ 1269

तच्छिरः पतितं तत्र दृष्ट्वा काशिपतेः पुरे।
जनः किमेतदित्याहच्छिन्नं केनेति विस्मितः॥ 28॥ 1270

ज्ञात्वा तं वासुदेवेन हतं तस्य सुतस्ततः।
पुरोहितेन सहितस्तोषयामास शङ्करम्॥ 29॥ 1271

अविमुक्ते महाक्षेत्रे तोषितस्तेन शङ्करः।
वरं वृणीष्वेति तदा तं प्रोवाच नृपात्मजम्॥ 30॥ 1272

स वव्रे भगवन्कृत्या पितृहन्तुर्वधाय मे।
समुत्तिष्ठतु कृष्णस्य त्वत्प्रसादान्महेश्वर॥ 31॥ 1273

श्रीपराशर उवाच

एवं भविष्यतीत्युक्ते दक्षिणाग्नेरनन्तरम्।
महाकृत्या समुत्तस्थौ तस्यैवाग्नेर्विनाशिनी॥ 32॥ 1274

ततो ज्वालाकरालास्या ज्वलत्केशकपालिका।
कृष्ण कृष्णेति कुपिता कृत्या द्वारवतीं ययौ॥ 33॥ 1275

तामवेक्ष्य जनस्त्रासाद्विचलल्लोचनो मुने।
ययौ शरण्यं जगतां शरणं मधुसूदनम्॥ 34॥ 1276

काशिराजसुतेनेयमाराध्य वृषभध्वजम्।
उत्पादिता महाकृत्येत्यवगम्याथ चक्रिणा॥ 35॥ 1277

जहि कृत्यामिमामुग्रां वह्निज्वालाजटालकाम्।
चक्रमुत्सृष्टमक्षेषु क्रीडासक्तेन लीलया॥ 36॥ 1278

तदग्निमालाजटिलज्वालोद्वारातिभीषणाम्।
कृत्यामनुजगामाशु विष्णुचक्रं सुदर्शनम्॥ 37॥ 1279

चक्रप्रतापनिर्दग्धा कृत्या माहेश्वरी तदा।
ननाश वेगिनी वेगात्तदप्यनुजगाम ताम्॥ **38**॥ 1280

कृत्या वाराणसीमेव प्रविवेश त्वरान्विता।
विष्णुचक्रप्रतिहतप्रभावा मुनिसत्तम॥ **39**॥ 1281

ततः काशीबलं भूरि प्रमथानां तथा बलम्।
समस्तशस्त्रास्त्रयुतं चक्रस्याभिमुखं ययौ॥ **40**॥ 1282

शस्त्रास्त्रमोक्षचतुरं दग्ध्वा तद्बलमोजसा।
कृत्यागर्भामशेषां तां तदा वाराणसीं पुरीम्॥ **41**॥ 1283

सभूभृद्भृत्यपौरां तु साश्वमातङ्गमानवाम्।
अशेषगोष्ठकोशां तां दुर्निरीक्ष्यां सुरैरपि॥ **42**॥ 1284

ज्वालापरिष्कृताशेषगृहप्राकारचत्वराम्।
ददाह तद्धरेश्चक्रं सकलामेव तां पुरीम्॥ **43**॥ 1285

अक्षीणामर्षमत्युग्रसाध्यसाधनसस्पृहम्।
तच्चक्रं प्रस्फुरद्दीप्ति विष्णोरभ्याययौ करम्॥ **44**॥ 1286

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे चतुस्त्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे पञ्चत्रिंशोऽध्यायः ॥

श्रीमैत्रेय उवाच

भूय एवाहमिच्छामि बलभद्रस्य धीमतः।
श्रोतुं पराक्रमं ब्रह्मन् तन्ममाख्यातुमर्हसि ॥ 1 ॥ 1287

यमुनाकर्षणादीनि श्रुतानि भगवन्मया।
तत्कथ्यतां महाभाग यदन्यत्कृतवान्बलः ॥ 2 ॥ 1288

श्रीपराशर उवाच

मैत्रेय श्रूयतां कर्म यद्रामेणाभवत्कृतम्।
अनन्तेनाप्रमेयेन शेषेण धरणीधृता ॥ 3 ॥ 1289

सुयोधनस्य तनयां स्वयंवरकृतक्षणाम्।
बलादादत्तवान्वीरस्साम्बो जाम्बवतीसुतः ॥ 4 ॥ 1290

ततः क्रुद्धा महावीर्याः कर्णदुर्योधनादयः।
भीष्मद्रोणादयश्चैनं बबन्धुर्युधि निर्जितम् ॥ 5 ॥ 1291

तच्छ्रुत्वा यादवास्सर्वे क्रोधं दुर्योधनादिषु।
मैत्रेय चक्रुः कृष्णश्च तान्निहन्तुं महोद्यमम् ॥ 6 ॥ 1292

तान्निवार्य बलः प्राह मदलोलकलाक्षरम्।
मोक्ष्यन्ति ते मद्वचनाद्यास्याम्येको हि कौरवान् ॥ 7 ॥ 1293

श्रीपराशर उवाच

बलदेवस्ततो गत्वा नगरं नागसाह्वयम्।
बाह्योपवनमध्येऽभून्न विवेश च तत्पुरम्॥ 8॥ 1294

बलमागतमाज्ञाय भूपा दुर्योधनादयः।
गामर्घ्यमुदकं चैव रामाय प्रत्यवेदयन्॥ 9॥ 1295

गृहीत्वा विधिवत्सर्वं ततस्तानाह कौरवान्।
आज्ञापयत्युग्रसेनस्साम्बमाशु विमुञ्चत॥ 10॥ 1296

ततस्तद्वचनं श्रुत्वा भीष्मद्रोणादयो नृपाः।
कर्णदुर्योधनाद्याश्च चुक्षुभुर्द्विजसत्तम॥ 11॥ 1297

ऊचुश्च कुपितास्सर्वे बाह्लिकाद्याश्च कौरवाः।
अराज्यार्हं यदोर्वंशमवेक्ष्य मुसलायुधम्॥ 12॥ 1298

भो भो किमेतद्भवता बलभद्रेरितं वचः।
आज्ञां कुरुकुलोत्थानां यादवः कः प्रदास्यति॥ 13॥ 1299

उग्रसेनोऽपि यद्याज्ञां कौरवाणां प्रदास्यति।
तदलं पाण्डुरैश्छत्रैर्नृपयोग्यैर्विडम्बनैः॥ 14॥ 1300

तद्गच्छ बल मा वा त्वं साम्बमन्यायचेष्टितम्।
विमोक्ष्यामो न भवतश्चोग्रसेनस्य शासनात्॥ 15॥ 1301

प्रणतिर्या कृतास्माकं मान्यानां कुकुरान्धकैः।
ननाम सा कृता केयमाज्ञा स्वामिनि भृत्यतः॥ 16॥ 1302

गर्वमारोपिता यूयं समानासनभोजनैः।
को दोषो भवतां नीतिर्यत्प्रीत्या नावलोकिता॥ 17॥ 1303

अस्माभिरर्घो भवतो योऽयं बल निवेदितः।
प्रेम्णैतन्नैतदस्माकं कुलाद्युष्मत्कुलोचितम्॥ 18॥ 1304

श्रीपराशर उवाच

इत्युक्त्वा कुरवः साम्बं मुञ्चामो न हरेस्सुतम्।
कृतैकनिश्चयास्तूर्णं विविशुर्गजसाह्वयम्॥ 19॥ 1305

मत्तः कोपेन चाघूर्णस्ततोऽधिक्षेपजन्मना।
उत्थाय पाष्ण्र्या वसुधां जघान स हलायुधः॥ 20॥ 1306

ततो विदारिता पृथ्वी पार्ष्णिघातान्महात्मनः।
आस्फोटयामास तदा दिशश्शब्देन पूरयन्॥ 21॥ 1307

उवाच चाताताम्राक्षो भृकुटीकुटिलाननः॥ 22॥ 1308

अहो मदावलेपोऽयमसाराणां दुरात्मनाम्।
कौरवाणां महीपत्वमस्माकं किल कालजम्।
उग्रसेनस्य ये नाज्ञां मन्यन्तेऽद्यापि लङ्घनम्॥ 23॥ 1309

उग्रसेनः समध्यास्ते सुधर्मां न शचीपतिः।
धिङ्मानुषशतोच्छिष्टे तुष्टिरेषां नृपासने॥ 24॥ 1310

पारिजाततरोः पुष्पमञ्जरीर्वनिताजनः।
बिभर्ति यस्य भृत्यानां सोऽप्येषां न महीपतिः॥ 25॥ 1311

समस्तभूभृतां नाथ उग्रसेनस्स तिष्ठतु।
अद्य निष्कौरवामुर्वी कृत्वा यास्यामि तत्पुरीम्॥ 26॥ 1312

कर्णं दुर्योधनं द्रोणमद्य भीष्मं सबाह्लिकम्।
दुश्शासनादीन्भूरिं च भूरिश्रवसमेव च॥ 27॥ 1313

सोमदत्तं शलं चैव भीमार्जुनयुधिष्ठिरान्।
यमौ च कौरवांश्चान्यान्हत्वा साश्वरथद्विपान्॥ 28॥ 1314

वीरमादाय तं साम्बं
सपत्नीकं ततः पुरीम्।
द्वारकामुग्रसेनादी -
न्गत्वा द्रक्ष्यामि बान्धवान्॥ 29॥ 1315

अथ वा कौरवावासं समस्तैः कुरुभिस्सह।
भागीरथ्यां क्षिपाम्याशु नगरं नागसाह्वयम्॥ 30॥ 1316

श्रीपराशर उवाच

इत्युक्त्वा मदरक्ताक्षः कर्षणाधोमुखं हलम्।
प्राकारवप्रदुर्गस्य चकर्ष मुसलायुधः॥ 31॥ 1317

आघूर्णितं तत्सहसा ततो वै हास्तिनं पुरम्।
दृष्ट्वा संक्षुब्धहृदयाश्चुक्षुभुः सर्वकौरवाः॥ 32॥ 1318

राम राम महाबाहो क्षम्यतां क्षम्यतां त्वया।
उपसंह्रियतां कोपः प्रसीद मुसलायुध॥ 33॥ 1319

एष साम्बस्सपत्नीकस्तव निर्यातितो बल।
अविज्ञातप्रभावाणां क्षम्यतामपराधिनाम्॥ 34॥ 1320

श्रीपराशर उवाच

ततो निर्यातयामासुस्साम्बं पत्नीसमन्वितम्।
निष्क्रम्य स्वपुरात्तूर्णं कौरवा मुनिपुङ्गव॥ 35॥ 1321

भीष्मद्रोणकृपादीनां प्रणम्य वदतां प्रियम्।
क्षान्तमेव मयेत्याह बलो बलवतां वरः॥ 36॥ 1322

अद्याप्याघूर्णिताकारं लक्ष्यते तत्पुरं द्विज।
एष प्रभावो रामस्य बलशौर्योपलक्षणः॥ 37॥ 1323

ततस्तु कौरवास्साम्बं सम्पूज्य हलिना सह।
प्रेषयामासुरुद्वाहधनभार्यासमन्वितम्॥ 38॥

1324

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे पञ्चत्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे षट्त्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

मैत्रेयैतद्बलं तस्य बलस्य बलशालिनः।
कृतं यदन्यत्तेनाभूत्तदपि श्रूयतां त्वया ॥ 1 ॥ 1325

नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः।
सखाभवन्महावीर्यो द्विविदो वानरर्षभः ॥ 2 ॥ 1326

वैरानुबन्धं बलवान्स चकार सुरान्प्रति।
नरकं हतवान्कृष्णो देवराजेन चोदितः ॥ 3 ॥ 1327

करिष्ये सर्वदेवानां तस्मादेतत्प्रतिक्रियाम्।
यज्ञविध्वंसनं कुर्वन् मर्त्यलोकक्षयं तथा ॥ 4 ॥ 1328

ततो विध्वंसयामास यज्ञानज्ञानमोहितः।
बिभेद साधुमर्यादां क्षयं चक्रे च देहिनाम् ॥ 5 ॥ 1329

ददाह सवनान्देशान्पुरग्रामान्तराणि च।
क्वचिच्च पर्वताक्षेपैर्ग्रामादीन्समचूर्णयत् ॥ 6 ॥ 1330

शैलानुत्पाट्य तोयेषु मुमोचाम्बुनिधौ तथा।
पुनश्चार्णवमध्यस्थः क्षोभयामास सागरम् ॥ 7 ॥ 1331

तेन विक्षोभितश्चाब्धिरुद्वेलो द्विज जायते।
प्लावयंस्तीरजान्ग्रामान्पुरादीनतिवेगवान् ॥ 8 ॥ 1332

कामरूपी महारूपं कृत्वा सस्यान्यशेषतः।
लुठन्भ्रमणसम्मर्दैस्सञ्चूर्णयति वानरः॥ 9॥ 1333

तेन विप्रकृतं सर्वं जगदेतद्दुरात्मना।
निस्स्वाध्यायवषट्कारं मैत्रेयासीत्सुदुःखितम्॥ 10॥ 1334

एकदा रैवतोद्याने पपौ पानं हलायुधः।
रेवती च महाभागा तथैवान्या वरस्त्रियः॥ 11॥ 1335

उद्गीयमानो विलसल्ललनामौलिमध्यगः।
रेमे यदुकुलश्रेष्ठः कुबेर इव मन्दरे॥ 12॥ 1336

ततस्स वानरोऽभ्येत्य गृहीत्वा सीरिणो हलम्।
मुसलं च चकारास्य सम्मुखं च विडम्बनम्॥ 13॥ 1337

तथैव योषितां तासां जहासाभिमुखं कपिः।
पानपूर्णांश्च करकाञ्चिक्षेपाहत्य वै तदा॥ 14॥ 1338

ततः कोपपरीतात्मा भर्त्सयामास तं हली।
तथापि तमवज्ञाय चक्रे किलकिलध्वनिम्॥ 15॥ 1339

ततः स्मयित्वा स बलो जग्राह मुसलं रुषा।
सोऽपि शैलशिलां भीमां जग्राह प्लवगोत्तमः॥ 16॥ 1340

चिक्षेप स च तां क्षिप्तां मुसलेन सहस्रधा।
बिभेद यादव श्रेष्ठस्सा पपात महीतले॥ 17॥ 1341

अथ तन्मुसलं चासौ समुल्लङ्घ्य प्लवङ्गमः।
वेगेनागत्य रोषेण करेणोरस्यताडयत्॥ 18॥ 1342

ततो बलेन कोपेन मुष्टिना मूर्ध्नि ताडितः।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः॥ 19॥ 1343

पतता तच्छरीरेण गिरेश्शृङ्गमशीर्यत।
मैत्रेय शतधा वज्रिवज्रेणेव विदारितम्॥ **20**॥ 1344

पुष्पवृष्टिं ततो देवा रामस्योपरि चिक्षिपुः।
प्रशशंसुस्ततोऽभ्येत्य साध्वेतत्ते महत्कृतम्॥ **21**॥ 1345

अनेन दुष्टकपिना दैत्यपक्षोपकारिणा।
जगन्निराकृतं वीर दिष्ट्या सक्षयमागतः॥ **22**॥ 1346

इत्युक्त्वा दिवमाजग्मुर्देवा हृष्टास्सगुह्यकाः॥ **23**॥ 1347

श्रीपराशर उवाच

एवंविधान्यनेकानि बलदेवस्य धीमतः।
कर्माण्यपरिमेयानि शेषस्य धरणीभृतः॥ **24**॥ 1348

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे षड्विंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे सप्तत्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

एवं दैत्यवधं कृष्णो बलदेवसहायवान्।
चक्रे दुष्टक्षितीशानां तथैव जगतः कृते ॥ 1 ॥ 1349

क्षितेश्च भारं भगवान्फाल्गुनेन समन्वितः।
अवतारयामास विभुस्समस्ताक्षौहिणीवधात् ॥ 2 ॥ 1350

कृत्वा भारावतरणं भुवो हत्वाखिलान्नृपान्।
शापव्याजेन विप्राणामुपसंहृतवान्कुलम् ॥ 3 ॥ 1351

उत्सृज्य द्वारकां कृष्णस्त्यक्त्वा मानुष्यमात्मनः।
सांशो विष्णुमयं स्थानं प्रविवेश मुने निजम् ॥ 4 ॥ 1352

श्रीमैत्रेय उवाच

स विप्रशापव्याजेन संजह्रे स्वकुलं कथम्।
कथं च मानुषं देहमुत्ससर्ज जनार्दनः ॥ 5 ॥ 1353

श्रीपराशर उवाच

विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः।
पिण्डारके महातीर्थे दृष्टा यदुकुमारकैः ॥ 6 ॥ 1354

ततस्ते यौवनोन्मत्ता भाविकार्यप्रचोदिताः।
साम्बं जाम्बवतीपुत्रं भूषयित्वा स्त्रियं यथा ॥ 7 ॥ 1355

प्रश्रितास्तान्मुनीनूचुः प्रणिपातपुरस्सरम्।
इयं स्त्री पुत्रकामा वै ब्रूत किं जनयिष्यति॥ 8॥ 1356

श्रीपराशर उवाच

दिव्यज्ञानोपपन्नास्ते विप्रलब्धाः कुमारकैः।
मुनयः कुपिताः प्रोचुर्मुसलं जनयिष्यति॥ 9॥ 1357

सर्वयादवसंहारकारणं भुवनोत्तरम्।
येनाखिलकुलोत्सादो यादवानां भविष्यति॥ 10॥ 1358

इत्युक्तास्ते कुमारास्तु आचचक्षुर्यथातथम्।
उग्रसेनाय मुसलं जज्ञे साम्बस्य चोदरात्॥ 11॥ 1359

तदुग्रसेनो मुसलमयश्चूर्णमकारयत्।
जज्ञे तदेरकाचूर्णं प्रक्षिप्तं तैर्महोदधौ॥ 12॥ 1360

मुसलस्याथ लोहस्य चूर्णितस्य तु यादवैः।
खण्डं चूर्णितशेषं तु ततो यत्तोमराकृति॥ 13॥ 1361

तदप्यम्बुनिधौ क्षिप्तं मत्स्यो जग्राह जालिभिः।
घातितस्योदरात्तस्य लुब्धो जग्राह तज्जराः॥ 14॥ 1362

विज्ञातपरमार्थोऽपि भगवान्मधुसूदनः।
नैच्छत्तदन्यथा कर्तुं विधिना यत्समीहितम्॥ 15॥ 1363

देवैश्च प्रहितो वायुः प्रणिपत्याह केशवम्।
रहस्येवमहं दूतः प्रहितो भगवन्सुरैः॥ 16॥ 1364

वस्वश्विमरुदादित्यरुद्रसाध्यादिभिस्सह।
विज्ञापयति शक्रस्त्वां तदिदं श्रूयतां विभो॥ 17॥ 1365

भारावतरणार्थाय वर्षाणामधिकं शतम्।
भगवानवतीर्णोऽत्र त्रिदशैस्सह चोदितः॥ **18**॥ 1366

दुर्वृत्ता निहता दैत्या भुवो भारोऽवतारितः।
त्वया सनाथास्त्रिदशा भवन्तु त्रिदिवे सदा॥ **19**॥ 1367

तदतीतं जगन्नाथ वर्षाणामधिकं शतम्।
इदानीं गम्यतां स्वर्गो भवता यदि रोचते॥ **20**॥ 1368

देवैर्विज्ञाप्यते देव तथात्रैव रतिस्तव।
तत्स्थीयतां यथाकालमाख्येयमनुजीविभिः॥ **21**॥ 1369

श्रीभगवानुवाच

यत्त्वमात्थाखिलं दूत वेद्म्येतदहमप्युत।
प्रारब्ध एव हि मया यादवानां परिक्षयः॥ **22**॥ 1370

भुवो नाद्यापि भारोऽयं यादवैरनिबर्हितैः।
अवतार्य करोम्येतत्सप्तरात्रेण सत्वरः॥ **23**॥ 1371

यथा गृहीतामम्भोधेर्दत्त्वाहं द्वारकाभुवम्।
यादवानुपसंहृत्य यास्यामि त्रिदशालयम्॥ **24**॥ 1372

मनुष्यदेहमुत्सृज्य संकर्षणसहायवान्।
प्राप्त एवास्मि मन्तव्यो देवेन्द्रेण तथामरैः॥ **25**॥ 1373

जरासन्धादयो येऽन्ये निहता भारहेतवः।
क्षितेस्तेभ्यः कुमारोऽपि यदूनां नापचीयते॥ **26**॥ 1374

तदेतं सुमहाभारमवतार्य क्षितेरहम्।
यास्याम्यमरलोकस्य पालनाय ब्रवीहि तान्॥ **27**॥ 1375

श्रीपराशर उवाच

इत्युक्तो वासुदेवेन देवदूतः प्रणम्य तम्।
मैत्रेय दिव्यया गत्या देवराजान्तिकं ययौ॥ 28॥ 1376

भगवानप्यथोत्पातान्दिव्यभौमान्तरिक्षजान्।
ददर्श द्वारकापुर्यां विनाशाय दिवानिशम्॥ 29॥ 1377

तान्दृष्ट्वा यादवानाह पश्यध्वमतिदारुणान्।
महोत्पाताञ्च्छमायैषां प्रभासं याम मा चिरम्॥ 30॥ 1378

श्रीपराशर उवाच

एवमुक्ते तु कृष्णेन यादवप्रवरस्ततः।
महाभागवतः प्राह प्रणिपत्योद्धवो हरिम्॥ 31॥ 1379

भगवन्यन्मया कार्यं तदाज्ञापय साम्प्रतम्।
मन्ये कुलमिदं सर्वं भगवान्संहरिष्यति॥ 32॥ 1380

नाशायास्य निमित्तानि कुलस्याच्युत लक्षये॥ 33॥ 1381

श्रीभगवानुवाच

गच्छ त्वं दिव्यया गत्या मत्प्रसादसमुत्थया।
यद्वदर्याश्रमं पुण्यं गन्धमादनपर्वते।
नरनारायणस्थाने तत्पवित्रं महीतले॥ 34॥ 1382

मन्मना मत्प्रसादेन तत्र सिद्धिमवाप्स्यसि।
अहं स्वर्गं गमिष्यामि ह्युपसंहृत्य वै कुलम्॥ 35॥ 1383

द्वारकां च मया त्यक्तां समुद्रः प्लावयिष्यति।
मद्वेश्म चैकं मुक्त्वा तु भयान्मत्तो जलाशये।
तत्र सन्निहितश्चाहं भक्तानां हितकाम्यया॥ 36॥ 1384

श्रीपराशर उवाच

इत्युक्तः प्रणिपत्यैनं जगामाशु तपोवनम्।
नरनारायणस्थानं केशवेनानुमोदितः॥ 37॥ 1385

ततस्ते यादवास्सर्वे रथानारुह्य शीघ्रगान्।
प्रभासं प्रययुस्सार्धं कृष्णरामादिभिर्द्विज॥ 38॥ 1386

प्रभासं समनुप्राप्ताः कुकुरान्धकवृष्णयः।
चक्रुस्तत्र महापानं वासुदेवेन चोदिताः॥ 39॥ 1387

पिबतां तत्र चैतेषां सङ्कर्षेण परस्परम्।
अतिवादेन्धनो जज्ञे कलहाग्निः क्षयावहः॥ 40॥ 1388

श्रीमैत्रेय उवाच

स्वं स्वं वै भुञ्जतां तेषां कलहः किन्निमित्तकः।
सङ्कर्षो वा द्विजश्रेष्ठ तन्ममाख्यातुमर्हसि॥ 41॥ 1389

श्रीपराशर उवाच

मृष्टं मदीयमन्नं ते न मृष्टमिति जल्पताम्।
मृष्टामृष्टकथा जज्ञे सङ्कर्षकलहौ ततः॥ 42॥ 1390

ततश्चान्योन्यमभ्येत्य क्रोधसंरक्तलोचनाः।
जघ्नुः परस्परं ते तु शस्त्रैर्देवबलात्कृताः॥ 43॥ 1391

क्षीणशस्त्राश्च जगृहुः प्रत्यासन्नामथैरकाम्॥ 44॥ 1392

एरका तु गृहीता वै वज्रभूतेव लक्ष्यते।
तया परस्परं जघ्नुस्संप्रहारे सुदारुणे॥ 45॥ 1393

प्रद्युम्नसाम्बप्रमुखाः कृतवर्माथ सात्यकिः।
अनिरुद्धादयश्चान्ये पृथुर्विपृथुरेव च॥ 46॥ 1394

चारुवर्मा चारुकश्च तथाक्रूरादयो द्विज।
एरकारूपिभिर्वज्रैस्ते निजघ्नुः परस्परम्॥ 47॥ 1395

निवारयामास हरिर्यादवांस्ते च केशवम्।
सहायं मेनिरेऽरीणां प्राप्तं जघ्नुः परस्परम्॥ 48॥ 1396

कृष्णोऽपि कुपितस्तेषामेरकामुष्टिमाददे।
वधाय सोऽपि मुसलं मुष्टिर्लौहमभूत्तदा॥ 49॥ 1397

जघान तेन निश्शेषान्यादवानाततायिनः।
जघ्नुस्ते सहसाभ्येत्य तथान्येऽपि परस्परम्॥ 50॥ 1398

ततश्चार्णवमध्येन जैत्रोऽसौ चक्रिणो रथः।
पश्यतो दारुकस्याथ प्रायादश्वैर्धृतो द्विज॥ 51॥ 1399

चक्रं गदा तथा शार्ङ्ग तूणी शङ्खोऽसिरेव च।
प्रदक्षिणं हरिं कृत्वा जग्मुरादित्यवर्त्मना॥ 52॥ 1400

क्षणेन नाभवत्कश्चिद्यादवानामघातितः।
ऋते कृष्णं महात्मानं दारुकं च महामुने॥ 53॥ 1401

चङ्क्रम्यमाणौ तौ रामं वृक्षमूले कृतासनम्।
ददृशाते मुखाद्यास्य निष्क्रामन्तं महोरगम्॥ 54॥ 1402

निष्क्रम्य स मुखात्तस्य महाभोगो भुजङ्गमः।
प्रययावर्णवं सिद्धैः पूज्यमानस्तथोरगैः॥ 55॥ 1403

ततोऽर्घ्यमादाय तदा जलधिस्सम्मुखं ययौ।
प्रविवेश ततस्तोयं पूजितः पन्नगोत्तमैः॥ 56॥ 1404

दृष्ट्वा बलस्य निर्याणं दारुकं प्राह केशवः।
इदं सर्वं समाचक्ष्व वसुदेवोग्रसेनयोः॥ 57॥ 1405

निर्याणं बलभद्रस्य यादवानां तथा क्षयम्।
योगे स्थित्वाहमप्येतत्परित्यक्ष्ये कलेवरम्॥ 58॥ 1406

वाच्यश्च द्वारकावासी जनस्सर्वस्तथाहुकः।
यथेमां नगरीं सर्वां समुद्रः प्लावयिष्यति॥ 59॥ 1407

तस्माद्भवद्भिस्सर्वैस्तु प्रतीक्ष्यो ह्यर्जुनागमः।
न स्थेयं द्वारकामध्ये निष्क्रान्ते तत्र पाण्डवे॥ 60॥ 1408

तेनैव सह गन्तव्यं यत्र याति स कौरवः॥ 61॥ 1409

गत्वा च ब्रूहि कौन्तेयमर्जुनं वचनान्मम।
पालनीयस्त्वया शक्त्या जनोऽयं मत्परिग्रहः॥ 62॥ 1410

त्वमर्जुनेन सहितो द्वारवत्यां तथा जनम्।
गृहीत्वा याहि वज्रश्च यदुराजो भविष्यति॥ 63॥ 1411

श्रीपराशर उवाच

इत्युक्तो दारुकः कृष्णं प्रणिपत्य पुनः पुनः।
प्रदक्षिणं च बहुशः कृत्वा प्रायाद्यथोदितम्॥ 64॥ 1412

स च गत्वा तदाचष्ट द्वारकायां तथार्जुनम्।
आनिनाय महाबुद्धिर्वज्रं चक्रे तथा नृपम्॥ 65॥ 1413

[भगवानपि गोविन्दो वासुदेवात्मकं परम्।
ब्रह्मात्मनि समारोप्य सर्वभूतेष्वधारयत्॥] 1414

निष्प्रपञ्चे महाभाग संयोज्यात्मानमात्मनि।
तुर्यावस्थं सलीलं च शेते स्म पुरुषोत्तमः॥ 66॥ 1415

सम्मानयन्द्विजवचो दुर्वासा यदुवाच ह।
योगयुक्तोऽभवत्पादं कृत्वा जानुनि सत्तम॥ 67॥ 1416

आययौ च जरानाम तदा तत्र स लुब्धकः।
मुसलावशेषलोहैकसायकन्यस्ततोमरः॥ 68॥ 1417

स तत्पादं मृगाकारमवेक्ष्यारादवस्थितः।
तले विव्याध तेनैव तोमरेण द्विजोत्तम॥ 69॥ 1418

ततश्च ददृशे तत्र चतुर्बाहुधरं नरम्।
प्रणिपत्याह चैवैनं प्रसीदेति पुनः पुनः॥ 70॥ 1419

अजानता कृतमिदं मया हरिणशंकया।
क्षम्यतां मम पापेन दग्धं मां त्रातुमर्हसि॥ 71॥ 1420

श्रीपराशर उवाच

ततस्तं भगवानाह न तेऽस्तु भयमण्वपि।
गच्छ त्वं मत्प्रसादेन लुब्ध स्वर्गं सुरास्पदम्॥ 72॥ 1421

विमानमागतं सद्यस्तद्वाक्यसमनन्तरम्।
आरुह्य प्रययौ स्वर्गं लुब्धकस्तत्प्रसादतः॥ 73॥ 1422

गते तस्मिन्स भगवान्संयोज्यात्मानमात्मनि।
ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले॥ 74॥ 1423

अजन्मन्यमरे विष्णावप्रमेयेऽखिलात्मनि।
तत्याज मानुषं देहमतीत्य त्रिविधां गतिम्॥ 75॥ 1424

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे सप्तत्रिंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पञ्चमेंऽशे अष्टात्रिंशोऽध्यायः ॥

श्रीपराशर उवाच

अर्जुनोऽपि तदान्विष्य रामकृष्णकलेवरे।
संस्कारं लम्भयामास तथान्येषामनुक्रमात्॥ 1 ॥ 1425

अष्टौ महिष्यः कथिता रुक्मिणीप्रमुखास्तु याः।
उपगुह्य हरेर्देहं विविशुस्ता हुताशनम्॥ 2 ॥ 1426

रेवती चापि रामस्य देहमाश्लिष्य सत्तमा।
विवेश ज्वलितं वह्निं तत्सङ्गाह्लादशीतलम्॥ 3 ॥ 1427

उग्रसेनस्तु तच्छ्रुत्वा तथैवानकदुन्दुभिः।
देवकी रोहिणी चैव विविशुर्जातवेदसम्॥ 4 ॥ 1428

ततोऽर्जुनः प्रेतकार्यं कृत्वा तेषां यथाविधि।
निश्चक्राम जनं सर्वं गृहीत्वा वज्रमेव च॥ 5 ॥ 1429

द्वारवत्या विनिष्क्रान्ताः कृष्णपत्न्यः सहस्रशः।
वज्रं जनं च कौन्तेयः पालयञ्छनकैर्ययौ॥ 6 ॥ 1430

सभा सुधर्मा कृष्णेन मर्त्यलोके समुज्झिते।
स्वर्गं जगाम मैत्रेय पारिजातश्च पादपः॥ 7 ॥ 1431

यस्मिन्दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम्।
तस्मिन्नेवावतीर्णोऽयं कालकायो बली कलिः॥ 8 ॥ 1432

प्लावयामास तां शून्यां द्वारकां च महोदधिः।
वासुदेवगृहं त्वेकं न प्लावयति सागरः॥ 9॥ 1433

नातिक्रान्तुमलं ब्रह्मंस्तदद्यापि महोदधिः।
नित्यं सन्निहितस्तत्र भगवान्केशवो यतः॥ 10॥ 1434

तदतीव महापुण्यं सर्वपातकनाशनम्।
विष्णुश्रियान्वितं स्थानं दृष्ट्वा पापाद्विमुच्यते॥ 11॥ 1435

पार्थः पञ्चनदे देशे बहुधान्यधनान्विते।
चकार वासं सर्वस्य जनस्य मुनिसत्तमः॥ 12॥ 1436

ततो लोभस्समभवत्पार्थेनैकेन धन्विना।
दृष्ट्वा स्त्रियो नीयमाना दस्यूनां निहतेश्वराः॥ 13॥ 1437

ततस्ते पापकर्माणो लोभोपहृतचेतसः।
आभीरा मन्त्रयामासुस्समेत्यात्यन्तदुर्मदाः॥ 14॥ 1438

अयमेको ऽर्जुनो धन्वी स्त्रीजनं निहतेश्वरम्।
नयत्यस्मानतिक्रम्य धिगेतद्भवतां बलम्॥ 15॥ 1439

हत्वा गर्वसमारूढो भीष्मद्रोणजयद्रथान्।
कर्णादींश्च न जानाति बलं ग्रामनिवासिनाम्॥ 16॥ 1440

यष्टिहस्तानवेक्ष्यास्मान्धनुष्पाणिस्स दुर्मतिः।
सर्वानेवावजानाति किं वो बाहुभिरुन्नतैः॥ 17॥ 1441

ततो यष्टिप्रहरणा दस्यवो लोष्टधारिणः।
सहस्रशोऽभ्यधावन्त तं जनं निहतेश्वरम्॥ 18॥ 1442

ततो निर्भर्त्स्य कौन्तेयः प्राहाभीरान्हसन्निव।
निवर्तध्वमधर्मज्ञा यदि न स्थ मुमूर्षवः॥ 19॥ 1443

अवज्ञाय वचस्तस्य जगृहुस्ते तदा धनम्।
स्त्रीधनं चैव मैत्रेय विष्वक्सेनपरिग्रहम्॥ 20॥ 1444

ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं युधि।
आरोपयितुमारेभे न शशाक च वीर्यवान्॥ 21॥ 1445

चकार सज्यं कृच्छ्राच्च तच्चाभूच्छिथिलं पुनः।
न सस्मार ततोऽस्त्राणि चिन्तयन्नपि पाण्डवः॥ 22॥ 1446

शरान्मुमोच चैतेषु पार्थो वैरिष्वमर्षितः।
त्वग्भेदं ते परं चक्रुरस्ता गाण्डीवधन्विना॥ 23॥ 1447

वह्निना येऽक्षया दत्ताश्शरास्तेऽपि क्षयं ययुः।
युद्ध्यतस्सह गोपालैरर्जुनस्य भवक्षये॥ 24॥ 1448

अचिन्तयच्च कौन्तेयः कृष्णस्यैव हि तद्बलम्।
यन्मया शरसङ्घातैस्सकला भूभृतो हताः॥ 25॥ 1449

मिषतः पाण्डुपुत्रस्य ततस्ताः प्रमदोत्तमाः।
आभीरैरपकृष्यन्त कामं चान्याः प्रदुद्रुवुः॥ 26॥ 1450

ततश्शरेषु क्षीणेषु धनुष्कोट्या धनञ्जयः।
जघान दस्यूंस्ते चास्य प्रहाराञ्जहसुर्मुने॥ 27॥ 1451

प्रेक्षतस्तस्य पार्थस्य वृष्ण्यन्धकवरस्त्रियः।
जग्मुरादाय ते म्लेच्छाः समस्ता मुनिसत्तम॥ 28॥ 1452

ततस्सुदुःखितो जिष्णुः कष्टं कष्टमिति ब्रुवन्।
अहो भगवतानेन वञ्चितोऽस्मि रुरोद ह॥ 29॥ 1453

तद्धनुस्तानि शस्त्राणि स रथस्ते च वाजिनः।
सर्वमेकपदे नष्टं दानमश्रोत्रिये यथा॥ 30॥ 1454

अहोऽतिबलवद्दैवं विना तेन महात्मना।
यदसामर्थ्ययुक्तेऽपि नीचवर्गे जयप्रदम्॥ 31॥ 1455

तौ बाहू स च मे मुष्टिः स्थानं तत्सोऽस्मि चार्जुनः।
पुण्येनैव विना तेन गतं सर्वमसारताम्॥ 32॥ 1456

ममार्जुनत्वं भीमस्य भीमत्वं तत्कृते ध्रुवम्।
विना तेन यदाभीरैर्जितोऽहं रथिनां वरः॥ 33॥ 1457

श्रीपराशर उवाच

इत्थं वदन्ययौ जिष्णुरिन्द्रप्रस्थं पुरोत्तमम्।
चकार तत्र राजानं वज्रं यादवनन्दनम्॥ 34॥ 1458

स ददर्श ततो व्यासं फाल्गुनः काननाश्रयम्।
तमुपेत्य महाभागं विनयेनाभ्यवादयत्॥ 35॥ 1459

तं वन्दमानं चरणाववलोक्य मुनिश्चिरम्।
उवाच वाक्यं विच्छायः कथमद्य त्वमीदृशः॥ 36॥ 1460

अवीरजोऽनुगमनं ब्रह्महत्या कृताथ वा।
दृढाशाभङ्गदुःखीव भ्रष्टच्छायोऽसि साम्प्रतम्॥ 37॥ 1461

सान्तानिकादयो वा ते याचमाना निराकृताः।
अगम्यस्त्रीरतिर्वा त्वं येनासि विगतप्रभः॥ 38॥ 1462

भुङ्क्तेऽप्रदाय विप्रेभ्यो मिष्टमेकोऽथ वा भवान्।
किं वा कृपणवित्तानि हृतानि भवतार्जुन॥ 39॥ 1463

कच्चिन्नु शूर्पवातस्य गोचरत्वं गतोऽर्जुन।
दुष्टचक्षुर्हतो वाऽसि निश्श्रीकः कथमन्यथा॥ 40॥ 1464

स्पृष्टो नखाम्भसा वाथ घटवार्युक्षितोऽपि वा।
केन त्वं वासि विच्छायो न्यूनैर्वा युधि निर्जितः॥ **41**॥ 1465

श्रीपराशर उवाच

ततः पार्थो विनिःश्वस्य श्रूयतां भगवन्निति।
उक्त्वा यथावदाचष्टे व्यासायात्मपराभवम्॥ **42**॥ 1466

अर्जुन उवाच

यद्बलं यच्च मत्तेजो यद्वीर्यं यः पराक्रमः।
या श्रीश्छाया च नः सोऽस्मान्परित्यज्य हरिर्गतः॥ **43**॥ 1467

ईश्वरेणापि महता स्मितपूर्वाभिभाषिणा।
हीना वयं मुने तेन जातास्तृणमया इव॥ **44**॥ 1468

अस्त्राणां सायकानां च गाण्डीवस्य तथा मम।
सारता याभवन्मूर्त्तिस्स गतः पुरुषोत्तमः॥ **45**॥ 1469

यस्यावलोकनादस्माञ्छ्रीर्जयः सम्पदुन्नतिः।
न तत्याज स गोविन्दस्त्यक्त्वास्माम्भगवान्गतः॥ **46**॥ 1470

भीष्मद्रोणाङ्गराजाद्यास्तथा दुर्योधनादयः।
यत्प्रभावेण निर्दग्धास्स कृष्णस्त्यक्तवान्भुवम्॥ **47**॥ 1471

निर्यौवना गतश्रीका नष्टच्छायेव मेदिनी।
विभाति तात नैकोऽहं विरहे तस्य चक्रिणः॥ **48**॥ 1472

यस्य प्रभावाद्भीष्माद्यैर्मय्यग्नौ शलभायितम्।
विना तेनाद्य कृष्णेन गोपालैरस्मि निर्जितः॥ **49**॥ 1473

गाण्डीवस्त्रिषु लोकेषु ख्यातिं यदनुभावतः।
गतस्तेन विनाभीरलगुडैस्स तिरस्कृतः॥ **50**॥ 1474

स्त्रीसहस्राण्यनेकानि मन्नाथानि महामुने।
यततो मम नीतानि दस्युभिर्लगुडायुधैः॥ 51॥ 1475

आनीयमानमाभीरैः कृष्ण कृष्णावरोधनम्।
हृतं यष्टिप्रहरणैः परिभूय बलं मम॥ 52॥ 1476

निश्श्रीकता न मे चित्रं यज्जीवामि तदद्भुतम्।
नीचावमानपङ्काङ्की निर्लज्जोऽस्मि पितामह॥ 53॥ 1477

श्रीव्यास उवाच

अलं ते व्रीडया पार्थ न त्वं शोचितुमर्हसि।
अवेहि सर्वभूतेषु कालस्य गतिरीदृशी॥ 54॥ 1478

कालो भवाय भूतानामभवाय च पाण्डव।
कालमूलमिदं ज्ञात्वा भव स्थैर्यपरोऽर्जुन॥ 55॥ 1479

नद्यः समुद्रा गिरयस्सकला च वसुन्धरा।
देवा मनुष्याः पशवस्तरवश्च सरीसृपाः॥ 56॥ 1480

सृष्टाः कालेन कालेन पुनर्यास्यन्ति संक्षयम्।
कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहि॥ 57॥ 1481

कालस्वरूपी भगवान्कृष्णः कमललोचनः।
यच्चात्थ कृष्णमाहात्म्यं तत्तथैव धनञ्जय॥ 58॥ 1482

भारावतारकार्यार्थमवतीर्णस्स मेदिनीम्।
भाराक्रान्ता धरा याता देवानां समितिं पुरा॥ 59॥ 1483

तदर्थमवतीर्णोऽसौ कालरूपी जनार्दनः।
तच्च निष्पादितं कार्यमशेषा भूभुजो हताः॥ 60॥ 1484

वृष्ण्यन्धककुलं सर्वं तथा पार्थोपसंहृतम्।
न किञ्चिदन्यत्कर्तव्यं तस्य भूमितले प्रभोः॥ **61**॥ 1485

अतो गतस्स भगवान्कृतकृत्यो यथेच्छया।
सृष्टिं सर्गे करोत्येष देवदेवः स्थितौ स्थितिम्।
अन्तेऽन्ताय समर्थोऽयं साम्प्रतं वै यथा गतः॥ **62**॥ 1486

तस्मात्पार्थ न सन्तापस्त्वया कार्यः पराभवे।
भवन्ति भावाः कालेषु पुरुषाणां यतः स्तुतिः॥ **63**॥ 1487

त्वयैकेन हता भीष्मद्रोणकर्णादयो रणे।
तेषामर्जुन कालोत्थः किं न्यूनाभिभवो न सः॥ **64**॥ 1488

विष्णोस्तस्य प्रभावेण यथा तेषां पराभवः।
कृतस्तथैव भवतो दस्युभ्यस्स पराभवः॥ **65**॥ 1489

स देवेशश्शरीराणि समाविश्य जगत्स्थितिम्।
करोति सर्वभूतानां नाशमन्ते जगत्पतिः॥ **66**॥ 1490

भगोदये ते कौन्तेय सहायोऽभूज्जनार्दनः।
तथान्ते तद्विपक्षास्ते केशवेन विलोकिताः॥ **67**॥ 1491

कश्श्रद्दध्यात्सगाङ्गेयान्हन्यास्त्वं कौरवानिति।
आभीरेभ्यश्च भवतः कः श्रद्दध्यात्पराभवम्॥ **68**॥ 1492

पार्थैतत्सर्वभूतस्य हरेर्लीलाविचेष्टितम्।
त्वया यत्कौरवा ध्वस्ता यदाभीरैर्भवाञ्जितः॥ **69**॥ 1493

गृहीता दस्युभिर्याश्च भवाञ्छोचति तास्स्त्रियः।
एतस्याहं यथावृत्तं कथयामि तवार्जुन॥ **70**॥ 1494

अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्।
बहून्वर्षगणान्पार्थ गृणन्ब्रह्म सनातनम्॥ 71 ॥ 1495

जितेष्वसुरसङ्घेषु मेरुपृष्ठे महोत्सवः।
बभूव तत्र गच्छन्त्यो ददृशुस्तं सुरस्त्रियः॥ 72 ॥ 1496

रम्भातिलोत्तमाद्यास्तु शतशोऽथ सहस्रशः।
तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पाण्डव॥ 73 ॥ 1497

आकण्ठमग्नं सलिले जटाभारवहं मुनिम्।
विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः॥ 74 ॥ 1498

यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा।
सर्वास्ताः कौरवश्रेष्ठ तं वरिष्ठं द्विजन्मनाम्॥ 75 ॥ 1499

अष्टावक्र उवाच

प्रसन्नोऽहं महाभागा भवतीनां यदिष्यते।
मत्तस्तद्वियतां सर्वं प्रदास्याम्यतिदुर्लभम्॥ 76 ॥ 1500

रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन्।
प्रसन्ने त्वय्यपर्याप्तं किमस्माकमिति द्विज॥ 77 ॥ 1501

इतरास्त्वब्रुवन्विप्र प्रसन्नो भगवान्यदि।
तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र पुरुषोत्तमम्॥ 78 ॥ 1502

श्रीव्यास उवाच

एवं भविष्यतीत्युक्त्वा ह्युत्ततार जलान्मुनिः।
तमुत्तीर्णं च ददृशुर्विरूपं वक्रमष्टधा॥ 79 ॥ 1503

तं दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत्।
ताश्शशाप मुनिः कोपमवाप्य कुरुनन्दन॥ 80 ॥ 1504

यस्माद्विकृतरूपं मां मत्वा हासावमानना।
भवतीभिः कृता तस्मादेतं शापं ददामि वः॥ **81**॥ 1505

मत्प्रसादेन भर्तारं लब्ध्वा तु पुरुषोत्तमम्।
मच्छापोपहतास्सर्वा दस्युहस्तं गमिष्यथ॥ **82**॥ 1506

श्रीव्यास उवाच

इत्युदीरितमाकर्ण्य मुनिस्ताभिः प्रसादितः।
पुनस्सुरेन्द्रलोकं वै प्राह भूयो गमिष्यथ॥ **83**॥ 1507

एवं तस्य मुनेश्शापादष्टावक्रस्य चक्रिणम्।
भर्तारं प्राप्त ता याता दस्युहस्तं सुराङ्गनाः॥ **84**॥ 1508

तत्त्वया नात्र कर्त्तव्यश्शोकोऽल्पोऽपि हि पाण्डव।
तेनैवाखिलनाथेन सर्वं तदुपसंहृतम्॥ **85**॥ 1509

भवतां चोपसंहार आसन्नस्तेन पाण्डव।
बलं तेजस्तथा वीर्यं माहात्म्यं चोपसंहृतम्॥ **86**॥ 1510

जातस्य नियतो मृत्युः पतनं च तथोन्नतेः।
विप्रयोगावसानस्तु संयोगः सञ्चये क्षयः॥ **87**॥ 1511

विज्ञाय न बुधाश्शोकं न हर्षमुपयान्ति ये।
तेषामेवेतरे चेष्टां शिक्षन्तस्सन्ति तादृशाः॥ **88**॥ 1512

तस्मात्त्वया नरश्रेष्ठ ज्ञात्वैतद्भ्रातृभिस्सह।
परित्यज्याखिलं तन्त्रं गन्तव्यं तपसे वनम्॥ **89**॥ 1513

तद्गच्छ धर्मराजाय निवेद्यैतद्वचो मम।
परश्वो भ्रातृभिस्सार्धं यथा यासि तथा कुरु॥ **90**॥ 1514

इत्युक्तोऽभ्येत्य पार्थाभ्यां यमाभ्यां च सहार्जुनः।
दृष्टं चैवानुभूतं च सर्वमाख्यातवांस्तथा॥ **91**॥ 1515

व्यासवाक्यं च ते सर्वे श्रुत्वार्जुनमुखेरितम्।
राज्ये परीक्षितं कृत्वा ययुः पाण्डुसुता वनम्॥ **92**॥ 1516

इत्येतत्तव मैत्रेय विस्तरेण मयोदितम्।
जातस्य यद्यदोर्वंशे वासुदेवस्य चेष्टितम्॥ **93**॥ 1517

यश्चैतच्चरितं तस्य कृष्णस्य शृणुयात्सदा।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति॥ **94**॥ 1518

॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे अष्टात्रिंशोऽध्यायः॥